ISSN : 2454 - 2547/ ISSUE : 8

# *Rasikapriya*

JOURNAL OF MADRAS SANSKRIT COLLEGE-2021

Published by:
The Madras Sanskrit College

Affiliated to University of Madras
(Aided by Central Sanskrit University-Ministry of Education Govt. of India New Delhi)
84, Royapettah High Road, Mylapore, Chennai-600 004. PH. 044 24980421.
E-mail: mds.sanskritcollege@gmail.com
website: www.madrassanskrticollege.edu.in

RS. 200/-

विलासः ८

# रसिकप्रिया

JOURNAL OF MADRAS SANSKRIT COLLEGE

सविलासरसोल्लासा सुवृत्ता रसिकप्रिया । सगुणालङ्क्रिया जीयात् पत्रिका सुरगीरिव ॥

प्रधानसंपादकः
आचार्यः ता पे राधाकृष्णन् नम्पूतिरिः

Chief Editor:
Dr. T.P. Radhakrishnan Namboodiri
Principal, The Madras Sanskrit College



ISSN : 2454 - 2547

JOURNAL OF THE MADRAS SANSKRIT COLLEGE

# रसिकप्रिया

विलासः – ८

# RASIKAPRIYA

ISSUE - 8

संपादकः

**आचार्यः ता.पे. राधाकृष्णन् नम्पूतिरिः**

*Chief Editor :*

**Dr. T.P. Radhakrishnan**

Principal, The Madras Sanskrit College

*Published by :*

**THE MADRAS SANSKRIT COLLEGE**

(Affiliated to the University of Madras)

(Aided by the Central Sanskrit University, New Delhi)

84, Thiru-vi-ka Road (Royapettah High Road), Mylapore, Chennai - 600 004.

Phone : 044-2498 0421 E-mail : mds.sanskritcollege@gmail.com

website : www.madrassanskritcollege.edu.in

**2021**

Title of the Book : **RASIKAPRIYA**

ANNUAL JOURNAL OF THE MADRAS SANSKRIT COLLEGE

First Print : March 2021

© Madras Sanskrit College. All rights reserved. No material / Article be used in any manner without the permission of the Authors and the Madras Sanskrit College.

Copies : 300

Price : **Rs. 200/-**

Chief Editor : **Dr. T.P. Radhakrishnan,** Principal.

Editor : **Dr. Mani Dravid,** Associate Prof. & HOD., Mimamsa

Editorial Board : **Dr. S. Arunasundaram,** Asst. Prof. & HOD., Vyakarana

**Dr. Akhileshwara Mishra,** Asst. Prof. in Jyotisha

**Dr. K. Shyamasundara,** Asst. Prof. in Vyakarana

**Dr. S. Umapathi,** Asst. Prof. in Sahitya

**Dr. G. Suresh,** Asst. Prof. in Sahitya

Publisher : **Dr. T.P. Radhakrishnan,** Principal
The Mdaras Sanskrit College
84, Thiru-vi-ka Road (Royapettah High Road)
Mylapore, Chennai - 600 004.

Printer : Shri Harish Printers
Mandaveli, Chennai - 600 028

(Printed and Published by the Madras Sanskrit College, Mylapore, Chennai - 600 004 under financial assistance from the Central Sanskrit University , New Delhi, Ministry of H.R.D., Govt. of India).

## विषयानुक्रमणिका


सम्पादकीयम् Dr. ता.पे. राधाकृष्णन् नम्बूतिरिः, प्राचार्यः, म.सं.महावि. 01

प्रह्लादचरितवर्णने मीमांसान्यायसंचारः Dr. मणिद्राविडः, पूर्वमीमांसाध्यापकः, मद्रपुरीसंस्कृतमहावि. 02

विवेकचूडामणिः लघुमञ्जूषा च Dr. S. अरुणसुन्दरः, व्याकरणविभागाध्यक्षः, म.सं.महावि. 06

सर्वो द्वन्द्वो विभाषयैकवद्भवति Dr. K. श्यामसुन्दरः, व्याकरणविभागः, म.सं.महावि. 10

ब्रह्मसूत्रेषु ऐतरेयोपनिषदःप्रमेयविचारः Dr. V. रामकृष्णः, सहायकाचार्यः, वेदान्तविभागः, म.सं.महावि. 16

नाट्य-नृत्य-नृत्तभेदाः Dr. G. सुरेशः, सहायकाचार्यः, साहित्यविभागः, म.सं.महावि. 21

वास्तुशास्त्रम् डा. अखिलेश्वर मिश्रः, मद्रपुरी संस्कृत महाविद्यालयः, चेन्नै 24

द्वैतमतानुसारेण प्रमाणस्वरूपम् डा. पि.पि. श्रीधरोपाध्यायः, मद्रपुरीसंस्कृतकलाशाला, चेन्नै 26

काव्यस्यात्मा ध्वनिः K.V.SURYAPRAKASH, Research Assistant,
Sanskrit Academy , Osmania University 29

अल्कूरु मल्लिकार्जुनकृत पृथग्विध बहुवृत्तगर्भ पृथ्वीवृत्तम्
डा. जोषि सन्तोषकुमारः, संस्कृत अकाडमी ,
उस्मानिया विश्वविद्यालयः, हैदराबाद् 34

ऊरुभङ्गे सामाजिक-पारिवारिकपरिस्थितिः Ganga, O M, Research Scholar,
The Madras Sanskrit College 42

संस्कृते सुभाषितानाम् औन्नत्यम् एस्. सुगन्धा, शोधच्छात्रा, मद्रपुरी महाविद्यालयः 47

संस्कृत "भारत की पारंपरिक भाषा" घोषित हो Dr. Sathyanarayana H K,
Asst. Prof of Hindi , The Madras Sanskrit College 49

वैयाकरणमतरीत्या शब्दानां नित्यत्वनिरूपणम् Sri. R. Sridhar Sri Ahobila Muth Adarsh
Samskrita Maha Vidyalaya, Madurantakam 53

स्फोटवादनिरूपणम् व. राजगोपालः, उपाचार्यः, व्याकरणविभागः,
श्रीअहोबिलमठीयादर्शसंस्कृतमहाविद्यालयः, मधुरान्तकम् 57

महाभारतात् कतिपय प्रतिनायकानां चित्रणम् वी.एस्.सुदर्शनः, विद्यावारिधिः, साहित्यविभागः
तिरुपति राष्ट्रिय संस्कृत विश्वविद्यालयः 62

मीमांसायां षड्विधिप्रकारनिरूपणम् डा. एल्. सौजन्यकुमारः, शास्त्राध्यापकः,
जगद्गुरु वेदकाव्य विद्याभवनम् , चेन्नै 68

अभिनयदर्पणे तद्धितप्रयोगाः यो.षण्मुखप्रियदर्शिनी, शोधच्छात्रा, मद्रपुरीसंस्कृतमहाविद्यालयः 71

॥ श्रीवाग्देव्यै नमः ॥

# सम्पादकीयम्

**Dr. ता.पे. राधाकृष्णन् नम्बूतिरिः,**

प्राचार्यः, मद्रपुरीसंस्कृतमहाविद्यालयः

**शेषाद्रिनाथविदुषा समारब्धा सतां प्रिया।**
**शास्त्रार्थसंग्रहपरा राजते रसिकप्रिया॥**

**गुरून् अज्ञानदोषघ्नान् एकदन्तं सरस्वतीम्। व्यासं च दक्षिणामूर्तिं प्रणमामि पुनःपुनः॥**

अस्मद्गुरुभिः दर्शनपारङ्गताद्यनेकबिरुदभूषितैः मद्रपुरीयसंस्कृतमहाविद्यालयस्य प्राक्तनप्राचार्यैः **डा. के. वि. शेषाद्रिनाथशास्त्रि**महोदयैः बहुकालात् पूर्वं समारब्धा, मध्ये नैककारणैः स्तब्धा, प्रगतवर्षे प्राक्तनप्राचार्यैः **डा. नु. वे. देवीप्रसादशर्म**महोदयैः पुनः प्रवर्तिता **रसिकप्रिया**ख्या सहृदयहृदयोल्लासदायिनी इदंकलाशालायाः पत्रिकेयम् **जगद्गुरुश्रीकाञ्चीकामकोटिपीठाधिपतीनां** करुणापूरितानुग्रहविशेषेण पुष्टा, नानामठाधीशानां करुणाकटाक्षपातपात्रभूता, तत्तत्संस्थागतानेकविद्वद्वृन्दविरचितप्रबन्धवरैः समृद्धा, निर्वाहकसमितिसहयोगेन, नवदेहलीस्थ-**राष्ट्रियसंस्कृतसंस्थानस्य** आर्थिकसाहाय्येन, अस्मत्कलाशालायाः अध्यापकानां परिश्रमेणास्मद्धितैषिणां सर्वेषां साहाय्येन च मुहुः प्रकाशनपथमारोहतीति मोमुद्यते मे मनः।

नवदेहलीस्थ-**राष्ट्रियसंस्कृतसंस्थानस्य** आर्थिकसाहाय्येनास्मन्महाविद्यालये प्रतिवर्षं समायोज्यमानाः राष्ट्रियसंगोष्ठ्यः ऐषमः विश्वव्यापिन्याः Covid 19 इति सङ्केतितायाः महामार्याः अतर्किताक्रमणवशात् न प्रचालिताः। सर्वेष्वपि महाविद्यालयेषु पठनपाठनव्यवस्था Online माध्यमेन प्रचलति। एतद्वशादेवास्माकं बहवः सुहृदः, विद्वांसः, संस्कृतप्रेमिणश्च अकाले कालकवलिताः इति महतो विषादस्य विषयः। तेषां शाश्वती शान्तिर्भवत्विति भगवन्तं प्रार्थयामहे। अस्माकं भारतराष्ट्रसर्वकारस्य श्लाघनीयप्रयत्नेन संप्रति इयमापत् शनैः शनैः शाम्यतीति संतोषः। सत्यामप्यस्यां स्थितौ इयं **रसिकप्रिया** प्रकाश्यत इति महतः प्रमोदस्य विषयः।

अवसरेऽस्मिन् रसिकप्रियायाः संपाद्य प्रकाशने कृतभूरिपरिश्रमेभ्यः अस्मत्कलाशालायाः मीमांसाविभागाध्यक्षेभ्यः महामहोपाध्याय **डा. मणिद्राविड**महोदयेभ्यः, व्याकरणाचार्येभ्यः **डा. एस्. अरुणसुन्दर**महोदयेभ्यः, **डा. श्यामसुन्दर**महोदयेभ्यः, ज्योतिषाचार्येभ्यः **डा. अखिलेश्वरमिश्र**महोदयेभ्यः, साहित्याचार्येभ्यः **डा. एस्. उमापति**महोदयेभ्यः, **डा. G. सुरेश**महोदयेभ्यः, अन्येभ्यश्च प्रत्यक्षं परोक्षं वा साहाय्यमाचरितवद्भ्यो मदीयान् धन्यवादान् निवेदयामि। **रसिकप्रियां** चेमां सहृदयानां विद्वज्जनानां करकमलयोः सादरं प्रणतिपूर्वकम् उपायनीकरोमि इति शम्॥

# प्रह्लादचरितवर्णने मीमांसान्यायसंचारः

**Dr. श्रीमणिद्राविडः,**
पूर्वमीमांसाध्यापकः,
मद्रपुरी संस्कृतमहाविद्यालयः
मैलापूर् , चेन्नै - 600004

भगवता जैमिनिमहर्षिणा प्रणीतायां पूर्वमीमांसायां निरूपितानां न्यायानां न केवलं वेदार्थस्यैव निर्णय उपयोगः, अपि तु स्मृतिपुराणाद्यर्थनिर्णयेऽपि । स्मृत्यादिकर्तारो हि मन्वादयः वेदाभ्यासातिशयवशात् वेदवाक्यसदृशैरेव वाक्यैः स्वग्रन्थान् प्राणैषुः। अत एव स्मृतिपुराणादावपि विधिनिषेधार्थवादादीनामुपलम्भः। उक्तं च भट्टपादैः – "वेदप्रस्थानाभ्यासेन हि वाल्मीकिद्वैपायनप्रभृतिभिः तथैव स्ववाक्यानि प्रणीतानि । प्रतिपाद्यानां च विचित्रबुद्धित्वाद् युक्तमेवैतत् । इह केचिद् विधिमात्रेण प्रतिपद्यन्ते, अपरे सार्थवादेन, अपरेऽल्पेनार्थवादेन, अपरे महता । सर्वेषां च चित्तं ग्रहीतव्यमिति एवमारम्भः।" (तन्त्रवार्तिकम् 1.2.7) इति । तथा श्लोकवार्तिकेऽप्युक्तम् – "उपाख्यानादिरूपेण वृत्तिर्वेदवदेव नः। धर्मादौ भारतादीनाम् ........." (श्लो.वा.संबन्धाक्षेपपरिहारः 64) इति। अतश्च स्मृतिपुराणादीनामपि वेदवदेव प्रवृत्तेः तद्वाक्यतात्पर्यनिर्णयाय वेदार्थनिर्णयोपयुक्तानां पूर्वमीमांसान्यायानामाश्रयणं युक्तमेव ।

सम्प्रति पुराणेष्वपि क्वचित् विरोधपरिहारेणार्थनिर्णयाय तेषामावश्यकत्वं दर्शयितुमुदाहरणरूपेण पौराणिकं प्रह्लादचरितवर्णनमाश्रित्य मीमांसान्यायसंचारप्रकारः प्रदर्श्यते।

भक्तशिरोमणेः प्रह्लादस्य चरित्रं श्रीमद्भागवतादौ सुप्रसिद्धम् । तत्रापि मीमांसान्यायसञ्चारस्यावश्यकत्वप्रदर्शनाय संक्षेपेण तत्कथासन्दर्भः प्रस्तूयते –

भ्रातुर्हिरण्याक्षस्य वधेन क्रोधशोकाभ्यां सन्तप्तो हिरण्यकशिपुः दैत्यराजो भ्रातुर्घातकस्य भगवतो नारायणस्य वधचिकीर्षया आत्मनस्तत्सामर्थ्यं प्रेप्सुः मन्दराचलं गत्वा तपश्चचार । तीव्रेण च तपसा भगवन्तं ब्रह्माणं तोषयित्वा ततो लब्धाभीष्टवरः त्रैलोक्यं स्ववशीकृत्य नारायणं द्विषन् गोब्राह्मणदेवादीन् पीडयन् वैदिकं च धर्मं विनाशयन् बहूनि वर्षाणि शशास । तस्य च पुत्रः परमभागवतः प्रह्लादो नाम आबाल्यात् भगवति वासुदेवे नैसर्गिकीं रतिमनुभवन् अत्यन्तमेव पितुर्विपरीतस्वभावो बभूव । बालक एव सन् स गुरुकुले समवयस्कान् दैत्यबालकान् भागवतं धर्ममुपदिशति स्म । 'दैत्यकुले परिरक्षितस्य तव विना महत्सङ्गं कथमेवंविधज्ञानप्राप्तिः?' इति दैत्यबालकैः पृष्टः स कथयामास - "यदाऽहं मातुर्गर्भेऽभूवं तदा मत्पिता तपश्चरितुं मन्दराचलं गतवान् । अवसरमिमं प्राप्य देवाः दानवान् प्रति आक्रमणं चक्रुः । दैत्याश्च देवेभ्यो भीताः पलायिताः । इन्द्रस्तु भयोद्विग्नां रुदतीं मम मातरं बन्दीकृत्यानयत् । यदृच्छया मध्येमार्गं समागतो देवर्षिर्नारदः मन्मातरमिन्द्राद् रक्षित्वा निजाश्रमं समानीय 'वत्से, त्वद्भर्तुः तपसः

प्रत्यागमनपर्यन्तमिहैव ममाश्रमे वस' इत्यवोचत् । मन्माताऽपि वीतभया ऋषेः शुश्रूषणपरा तत्रैवावसत् । शुश्रूषया च सन्तुष्टं देवर्षिं सा गर्भस्थस्य शिशोः क्षेमं, भर्तुरागमनोत्तरं प्रसवं च वरमयाचत । देवर्षिणा च तदुभयमङ्गीकृत्य मां, मन्मातरं चोभौ उद्दिश्य ज्ञानोपदेशः कृतः । ऋषिणाऽनुगृहीतोऽहं तदुपदिष्टं स्मरामि। तदेव भवद्भ्यः उपदिष्टवानहम्" इति ।

एकदा गुरुकुलात् प्रत्यावृत्तं पुत्रं प्रेम्णाऽङ्कमारोप्य पप्रच्छ हिरण्यकशिपुः – 'वत्स यद् भवान् साधु मन्यते, तत् कथ्यताम्' इति । प्रह्लादश्चोवाच –

"तत् साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ।

हित्वाऽऽत्मपातं गृहमन्धकूपं वनं गतो यद् हरिमाश्रयेत ॥" (श्रीमद्भागवतम् 7.5.5) इति ।

पुत्रस्येदं वचनमाकर्ण्यासन्तुष्टोऽसुरराजः 'बालोऽयम् । अतः प्रतिपक्षिभिः अस्य मतिविपर्यासः सम्पादितः स्यात्' इति सम्भाव्य बालकस्य शिक्षकान् -

"सम्यग् विधार्यतां बालो गुरुगेहे द्विजातिभिः ।

विष्णुपक्षैः प्रतिच्छन्नैः न भिद्येतास्य धीर्यथा ॥"(श्रीमद्भागवतम् 7.5.7) इत्यादिदेश ।

पुनरवसरान्तरेऽसुरराट् पुत्रं परिष्वज्य, अङ्कमारोप्य, मूर्धन्यवघ्राय पप्रच्छ –

"प्रह्लादानूच्यतां तात! स्वधीतं किंचिदुत्तमम् ।

कालेनैतावताऽऽयुष्मन् ! यदशिक्षद् गुरोर्भवान्॥" (श्रीमद्भागवतम् 7.5.22) इति ॥

प्रह्लाद उवाच –

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।

इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।

क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥" (श्रीमद्भागवतम् 7.5.23,24) इति ।

तद् भगवद्भक्तिपूर्णं पुत्रवचनमसहमानः अमर्षाविष्टचेता हिरण्यकशिपुः विविधाभिर्यातनाभिः पुत्रं यातयामास । एवं यात्यमानोऽपि प्रह्लादः स्वयमविचलितो भगवद्भक्तिपरायणः दैत्यबालकानपि विष्णुभक्तिमनुशासत् पितुरत्यन्तक्रोधविषयो बभूव । ततो हिरण्यकशिपुः पुत्रमाहूय बहुधा तं निन्दित्वा -

"क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः ।

तस्य मेऽभीतवन्मूढ शासनं किम्बलोऽत्यगाः ॥" (श्रीमद्भागवतम् 7.8.7) इति पृष्टवान्।

पुनः प्रह्लादस्य – "न केवलं मे भवतश्च राजन् स वै बलं बलिनां चापरेषाम्" इत्यादि भगवद्विषयमेव प्रतिवचनं श्रुत्वा परमकुपितः हिरण्यकशिपुः –

"व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।

मुमूर्षूणां हि मन्दात्मन् ननु स्युर्विप्लवा गिरः ॥

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।

क्वासौ? यदि स सर्वत्र, कस्मात् स्तम्भे न दृश्यते? ॥

सोऽहं विकत्थमानस्य शिरः कायाद् हरामि ते ।

गोपायेत हरिस्त्वाऽद्य यस्ते शरणमीप्सितम्" ॥ (श्रीमद्भागवतम् 7.8.12,13,14)

इति दुरुक्तैर्वितुदन् खड्गमादाय आसनादुत्पतितः पुत्रं हन्तुमुद्युक्तः। तदैव भगवता स्तम्भमध्यात् नृसिंहरूपेणाविर्भूय पूर्वं ब्रह्मणा दत्तस्य वरस्याविरोधेन तस्य हृदयं विदार्य समुद्धारः कृतः इति प्रसिद्धा भागवती कथा ।

**अत्र काचित् शङ्का**

अस्यां कथायां विरोधशङ्कास्पदमिदं यत् - अत्र प्रह्लादस्य मातुरुदरे स्थितिकाले हिरण्यकशिपुः तपश्चरणे स्थितः। तस्य बाल्यावस्थायामेव च स भगवता विनाशित इति प्रसिद्धम् । एवं सति तपसो निवृत्त्यनन्तरं हिरण्यकशिपोः त्रैलोक्यशासनकालः -

"एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ।

कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः ॥" (श्रीमद्भागवतम् 7.4.20)

इति भागवते प्रदर्शितः कियान् इति भवति जिज्ञासा । अत्र श्रीधर्याम् –

"हिरण्यकशिपोर्भीत्या प्रपलाय्य शचीपतिः।

स्वर्गराज्यात् परिभ्रष्टो युगानामेकसप्ततिम् ॥"

इति पुराणान्तरपर्यालोचनया - 'महान् कालः = एकसप्ततियुगानि किञ्चिदधिकानि' इति व्याख्यातम् । यदीदं यथाश्रुतं स्वीक्रियते, तदा प्रह्लादजनन्या 'भर्तुस्तपसः प्रत्यागमनोत्तरं प्रसवो भवतु' इति प्रार्थनात् लिङ्गात् हिरण्यकशिपोरागमनोत्तरं प्रह्लादस्य प्रादुर्भावावगमात् , एकसप्ततियुगोत्तरं हिरण्यकशिपुवधकाले प्रह्लादस्यापि तावतः आयुषोऽवश्यंभावात् बाल्यावस्था विरुध्यते । मानुषे एकस्मिन् चतुर्युगे देवानां द्वादशसहस्रवर्षाणामत्ययेन दैववर्षगणनेनापि तस्य बाल्यावस्थायाः उपपादयितुमशक्यत्वात् । मनुष्याणामेकं चतुर्युगं हि देवानां द्वादशवर्षसहस्रात्मकमेकं युगम्। प्रह्लादश्च तस्मिन् काले पञ्चवर्षवयस्को बाल इति हिरण्यकशिपुवचनादेवावगम्यते -

"विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः ।

सौहृदं दुस्त्यजं पित्रोः अहाद् यः पञ्चहायनः ॥" (श्रीमद्भागवतम् 7.5.36) इति ।

किंच 'पुंसो वर्षशतं ह्यायुः' (श्रीमद्भागवतम् 7.6.6) इति प्रह्लादेनैवोक्तत्वात् वाक्यशेषविरोधोऽपि। अतः एकसप्ततियुगपर्यन्तं हिरण्यकशिपोः त्रैलोक्यशासनकल्पनं कथमिति ।

**उक्तशङ्कायाः मीमांसान्यायेन समाधानम्**

अत्रेदं समाधानं वक्तुं शक्यम् । पूर्वमीमांसायां षष्ठाध्यायस्य सप्तमे पादे विचारितम् – "पञ्च पञ्चाशतस्त्रिवृतः संवत्सराः। पञ्च पञ्चाशतः पञ्चदशाः। पञ्च पञ्चाशतः सप्तदशाः। पञ्च पञ्चाशत एकविंशाः। विश्वसृजां सहस्रसंवत्सरम् ।(तै.ब्रा. 3.12.9.8) " इति श्रुते सहस्रसंवत्सरसाध्ये विश्वसृजामयनाख्ये सत्रे कस्याधिकारः स्यादिति। तत्र हि न मनुष्याणामेतावदायुरस्ति । अतो गन्धर्वादीनामस्मिन् क्रतौ अधिकारः इत्यादीन् बहून् पूर्वपक्षकल्पान् प्रापय्य, सिद्धान्ते उक्तश्रुतौ संवत्सरपदं दिवसपरमित्युक्तम् – "अहानि वाऽभिसंख्यत्वात्" (जै.सू. 6.7.40) इति। द्वादशाहे त्रिवृत् अहः प्रस्तुत्य सङ्गवादिभेदेन पञ्चधा विभज्य, तत्र वसन्तादीनां षण्णामृतूनां कल्पनया तस्मिन् संवत्सरत्वसंपादनात् अह्नि संवत्सरशब्दप्रयोगदर्शनात्। अतो मनुष्याणामेवाधिकारः इति।

तत्र यथा संवत्सरशब्दो दिनपरः स्वीकृतस्तथा प्रकृते युगशब्दस्य 'मासः' इत्यर्थो यदि स्यात् , तदा उक्तो विरोधोऽवश्यं परिहृतो भवेत् । तथा स्वीकारे हि एकसप्ततिः युगानि = एकसप्ततिर्मासाः । द्वासप्ततिर्मासाः षड् वर्षाणि भवन्ति । अत एकेन मासेनोनः षड्वर्षात्मकः कालः हिरण्यकशिपोः राज्यशासनकालः इत्यायाति । तदा च बालकस्य प्रह्लादस्य वयस्तावदेवेति षड्वर्षदेशीये तस्मिन् 'पञ्चहायन' इत्युक्तिः सम्यक् सङ्गच्छते । अपूर्णषड्वर्षे प्रह्लादे 'पञ्चहायन' इत्युक्तिरपि न लोकविरुद्धा । लोके तथा व्यवहारस्य बहुलमुपलम्भात् ।

ननु ईषदूनः षड्वर्षकालः कथं 'महान् कालः' इति वक्तुं शक्य इति चेत् । काऽत्र हानिः ? । महान् काल एवायम्। यद्येतावतः कालस्य 'महान् कालः' इति पुराणेषु व्यपदेशे न मनसो विश्वासः, तर्हि एवं योजनीयम् । दुःखितस्य क्षणमात्रमपि 'महान् कालः' इति प्रतीयत इत्यनुभवसिद्धम् । गोपीनां हि श्रीकृष्णविरहतप्तानां क्षणार्धमपि युगायते स्म। "त्रुटि युगायते त्वामपश्यताम्" (श्रीमद्भागवतम् 10.31.15) इति हि गोपिकानां वचनम्। एवं सति किञ्चिदूनषड्वर्षकालं हिरण्यकशिपुना पीडितस्य लोकस्य तावति काले 'महान् कालः' इति प्रत्यये किमाश्चर्यम्? इत्थं च कल्प्यमाने न किञ्चिदस्वाभाविकं कल्पितं भवति ।

तथा उक्तवाक्यशेषविरोधोऽपि नास्ति। तस्मात् पूर्वोक्तपुराणान्तरवचनानुरोधेन श्रीमद्भागवते 'महान् कालः' इत्यस्य एकसप्ततियुगानि इत्यर्थस्वीकारेऽपि युगशब्दस्य मासार्थकत्वे एव सर्वसामञ्जस्यमिति भाति । विद्वांसः विषयमिमं पर्यालोचयन्त्विति शम् ॥

सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथाऽपि लिखितं यदि किंचिदस्य ।

संशोधने सहृदयाः सदया भवन्तु सत्सम्प्रदायपरिशीलननिर्विशङ्काः ॥

*****

# विवेकचूडामणिः लघुमञ्जूषा च

**Dr. S. ARUNASUNDARAM**
H.O.D. of VYAKARANA.
The Madras Sanskrit College,
Mylapore, Chennai.600004.

व्याकरणग्रन्थेषु श्रीनागोजीभट्टरचितः 'वैयाकरणसिद्धान्तलघुमञ्जूषा' इति ग्रन्थः प्रसिद्धः। स च ग्रन्थः व्यवहरणसौलभ्याय 'लघुमञ्जूषा' इति व्यवह्रियते। तत्र ग्रन्थे वैयाकरणसामान्यप्रक्रियाविषयान् विहाय, वैयाकरणाभिमताः स्फोटादयः प्रमेयाः निरूपिताः। तत्र प्रसङ्गात् बहुत्र जगत्स्वरूपप्रतिपादनादयः दार्शनिकाः अपि अंशाः आलोचिताः। ते च अद्वैतसमयमाश्रित्यैव प्रतिपादिताः इति यद्यपि ग्रन्थतः एव वयमधिगन्तुं प्रभवामः, तथापि नागोजीभट्टैः स्थाप्यमानानां वादानां कृते प्रकृतः 'विवेकचूडामणिः' कथं पोषकः भवति इति किञ्चिदिव अत्र प्रस्तूयते। तद्वत् क्वचित् उभयोरपि ग्रन्थयोः प्रतिपादनसादृश्यमपि प्रस्तूयते॥

**दृष्टान्तसादृश्यम्**

यः ब्रह्मवित् = मुमुक्षुः, तस्य ब्रह्मैव भासते, तदन्यत् न भासते, अर्थात् , सः ब्रह्मैव साक्षात्कर्तुं प्रभवति, नान्यत्। कथम्? चक्षुः यद्यपि ज्ञानेन्द्रियेषु अन्यतमं, तथापि रूपमेव ज्ञापयितुं प्रभवति, न तु रूपादन्यत् रसादिकम्। तद्वत् ब्रह्मवित् ब्रह्मैव वेत्ति, नान्यत् - इत्ययं विषयः-

"रूपादन्यदवेक्षितुं किमभितश्चक्षुष्मतां विद्यते
तद्वत् ब्रह्मविदः सतः किमपरं बुद्धेः विहारास्पदम्" ॥ (श्लोकः.५२२, वि.चू.)

इति विवेकचूडामणौ प्रत्यपादि ॥

स्वपक्षस्पष्टतायै एतादृशदृष्टान्तः नागोजीभट्टैरपि आदृतः। शब्दस्य स्वार्थेन सहैव सम्बन्धः। नान्येनार्थेन । स्वमेवार्थम् अभिधातुं शब्दः शक्नोति। कथम्? इन्द्रियाणां स्वस्वविषयैः साकमेव योग्यता अस्ति। सा च योग्यता अनादिः। इन्द्रियाणि चक्षुरादीनि स्वस्वविषयान् रूपादीन् त्यक्त्वा, अन्यान् रसादीन् पर्यायेणापि बोधयितुं यथा न प्रभवन्ति, तथैव शब्दाश्च स्वस्वार्थान् विहाय, अन्यानर्थान् न बोधयितुं क्षमन्ते। तत्र भर्तृहरिवाक्यम् उदाहरति नागोजीभट्टः –

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥" इति । (पृ.स. ८९, वै.सि.ल.म.)

प्रकृतसन्दर्भे उभयोः ग्रन्थयोः दृष्टान्तसादृश्यम् अनुभवामः॥

**शमादिसम्पन्नानामेव अखण्डार्थज्ञानम्**

शब्दार्थसम्बन्धविषये नागोजी एवमभिप्रैति – "तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया। तद्ग्राहकं च इतरेतराध्यासमूलकं तादात्म्यम्। तच्च सङ्केतः" (पृ.स.-६०,वै.सि.ल.म.) इति।

अयमभिप्रायः अन्यत्राप्युक्तः – "सङ्केतस्तु पदपदार्थयोः इतरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्दः इति"- (पृ.स.-६५,वै.सि.ल.म.) इति॥

तादात्म्यव्यवहारः एव सङ्केतः। स च शब्दार्थोभयाश्रितः सङ्केतः अत्र गृह्यते। तादृशतादात्म्यस्य शब्दे अर्थाध्यासः, अर्थे शब्दाध्यासश्च मूलम्। तादात्म्यव्यवहारेण पद-पदार्थसम्बन्धो ज्ञायते। एवं रीत्या शब्दानाम् अर्थेषु अध्यासः निरूपितः॥

यद्येवं तर्हि – 'तत्त्वमस्या'दिवाक्यस्य स्वार्थेन सह कीदृशं तादात्म्यम्? इति प्रश्ने, 'तत्त्वमस्या'दि वाक्यस्य अखण्डार्थेन शुद्धेनापि ब्रह्मणा आध्यासिकं तादात्म्यम्" (पृ.स.१०६, वै.सि.ल.म.) इति उत्तरितम्। अयमभिप्रायः – तत्त्वमस्यादिवाक्यस्य अखण्डार्थस्य ब्रह्मणः च मध्ये वाच्यवाचकभावरूपः सम्बन्धः। स च सम्बन्धः कथं ग्राह्यः? तादात्म्यव्यवहारेण। तादात्म्यव्यवहारश्च किंरूपः? योऽयं शब्दः; तत्त्वमस्यादि वाक्यम्, सोऽर्थः; अखण्डब्रह्मरूपः। योऽर्थः ; अखण्डब्रह्मरूपः, स शब्दः ; तत्त्वमस्यादि वाक्यरूपः" इति वृद्धव्यवहाररूपः॥

इदञ्च तादात्म्यं किंमूलकम्? अध्यासमूलकम्। स च अध्यासः किंरूपः? तत्त्वमस्यादिवाक्यरूपे शब्दे अखण्डरूपब्रह्मबुद्धिरूपः। अखण्डब्रह्मणि अर्थे तत्त्वमस्यादिशब्दबुद्धिरूपश्च। भवतु ! तादृशतादात्म्यज्ञानं, तादृशज्ञानेन तत्त्वमस्यादिवाक्य-अखण्डार्थब्रह्मणोः सम्बन्धज्ञानं च कस्य भवति? किं सर्वस्यापि भवति? इति संशये नागोजी वदति – तद्ग्रहश्च 'नेह नानास्ति' इत्यादि निषेधवाक्यमनने सति, शम-दमादिसम्पन्नस्य अतिशुद्धचित्तस्यैव इति न दोषः" इति॥ (पृ.स.११०, वै.सि.ल.म.)

एवञ्च ब्रह्मज्ञानाय शमदमादयः आवश्यकाः इति अभिप्रायः । किम् एवमेव अद्वैतिनो मन्वते? इति प्रश्ने विवेकचूडामणौ -

"विवेकिनो विरक्तस्य शमादिगुणशालिनः।
मुमुक्षोरेव हि ब्रह्मजिज्ञासा योग्यता मता॥" (श्लो.१७. वि.चू.)

इति पद्यमपि तथैवेति ब्रूते॥

किञ्च नागोजीभट्टैः उक्तवत् मननमपि आवश्यकमिति द्रढयति –

"साधनान्यत्र चत्वारि कथितानि मनीषिभिः।

एषु सत्स्वेव सन्निष्ठा यदभावे न सिद्ध्यति ॥ " इति। (श्लो.१८. वि.चू.)

**चित्तवृत्तिपरिणामः**

नागोजीभट्टः चित्तस्थमेव बहिः प्रकाशते इति निरूपयिष्यन् अन्यत्र एवं वदति – "बुद्धिसिद्धं तु तदसत्" इति। तत्=कार्यम्, उत्पत्तेः प्राक् नाशोत्तरं च असदपि, बुद्धिविषयतया सिद्धमिति तदर्थः" इति, (पृ.स.३६९, वै.सि.ल.म.)। "तथा च स्मृतिः –

"विप्र पृथ्व्यादि चित्तस्थं न बहिःस्थं कदाचन ।

स्वप्न-भ्रम-मदाद्येषु सर्वैरेवानुभूयते ॥" इति च। (पृ.स.३७७, वै.सि.ल.म.)

"भ्रमे ज्ञानाकारस्यैव विषये आरोपः- इति सिद्धान्तात्" इति च ॥(पृ.स.३७७, वै.सि.ल.म.)

वस्त्वाकारं ज्ञानमेव बाह्यप्रतीतिं जनयति इति नागोजीभट्टस्य पूर्वोक्तं वादं विवेकचूडामणिः बहुत्र पोषयति। तद्यथा - 'धीमात्रक-उपाधिः अशेषसाक्षी"( श्लो.१०१. वि.चू.)

'यो वा पुरैषोऽहमिति प्रतीतः बुद्ध्या अविविक्तः तमसा अतिमूढया।

तस्यैव निःशेषतया विनाशे ब्रह्मात्मभावः प्रतिबन्धशून्यः"॥( श्लो.३०२. वि.चू.)

"बन्धश्च मोक्षं च मृषैव मूढाः बुद्धे र्गुणं वस्तुनि कल्पयन्ति।" (श्लो.५७२. वि.चू.)

"अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि ।

बुद्धेरेव गुणावेतौ" (श्लो.५७३. वि.चू.) इति । एवञ्च बुद्धिगुणः एव बाह्यप्रत्ययः इति नागोजी वचनं निर्दुष्टमिति विवेकचूडामणिग्रन्थावलोकनेन वयं विद्मः॥

**अनिर्वचनीयोत्पत्तिविवादनिरासः**

मञ्जूषायां प्रसङ्गात् स्वप्नप्रपञ्चविषयकः अपि विचारः प्रस्तुतः। तत्र पङ्क्तिः एवमस्ति – "व्यासोऽपि 'मायामात्रं तु कार्त्स्न्येन अनभिव्यक्तेः' इति स्वप्नप्रपञ्चस्य मायामात्रत्वं, न तु बाह्यसर्गतुल्यत्वम् आह" इति, (पृ.स.३९१, वै.सि.ल.म.)

"मायामात्रम् - इति मात्रपदेन अनिर्वचनीयोत्पत्तिवादमपि निराकरोति" इति च ॥(पृ.स.३९३, वै.सि.ल.म.)

अयमभिप्रायः:- स्वप्ने तत्रत्यप्रपञ्चः अनिर्वचनीयतया उत्पद्यते इति केषाञ्चित् मतम्। परन्तु नागोजीभट्टः तन्नाङ्गीकरोति। अनिर्वचनीयोत्पत्तिं खण्डयित्वा, उपरि एवं वदति – "न च 'न तत्र रथाः, न रथयोगाः, न पन्थानो भवन्ति, अथ रथान्, रथयोगान्, पथः सृजते' इति स्वप्नविषयश्रुत्युक्तसृष्ट्यसङ्गतिरिति वाच्यम्, उपक्रमे रथाद्यभावः श्रुत्या उक्तः इति सृष्टिवचनं भाक्तम् – इति भाष्येणैव समाधानात्" इति॥(पृ.स.३९४, वै.सि.ल.म.)

अनेनापि वादेन अनिर्वचनीयोत्पत्तिवादं निराकुरुते। तर्हि स्वप्ने कथं रथादिप्रतीतिः इति प्रश्ने, वदति नागोजीभट्टः - "अत्र अन्तःकरणपर्यन्तं नष्टवृत्तिकत्वात्, चक्षुरादीनि न सन्तीत्युक्त्या, विशिष्टज्ञानाध्यासः दर्शितः" इति॥ (पृ.स.३९४, वै.सि.ल.म.)

प्रकृते ज्ञानाध्यासः इति नागोजीभट्टैः यदुक्तं तदेव शब्दान्तरेण विवेकचूडामणौ उक्तम् –

"स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या भोक्त्रादिविश्वं मन एव सर्वम् ।

तथैव जाग्रत्यपि नो विशेषः तत्सर्वमेतत् मनसो विजृम्भणम् ॥ इति ।(श्लो.१७२. वि.चू.)

उपरितनश्लोकः स्वप्ने इव जाग्रति अपि प्रपञ्चः मनोविजृम्भितः इति यथा वदति, तथा नागोजीभट्टोऽपि वदति - "सामग्रीव्यतिरेकाच्च अनुत्पत्तिं वदता शुक्तिरजतादिस्थलेऽपि अनुत्पत्तिः सूचिता।" इति॥ (पृ.स.३९४, वै.सि.ल.म.)

## अन्तःकरणदोषात् बाह्यसत्ता

अन्यत्रापि वदति नागोजीभट्टः- "'अबहीरूपोऽपि बहीरूपतया अध्यस्तः' इति पुञ्जराजः। अध्यासे बीजञ्च अन्तःकरणस्य रागादिदोषः एव।"(पृ.स.५०९, वै.सि.ल.म.) "चाकचक्यादि-विषयदोषवशाच्च चित्तवृत्तेः तथा परिणामः।" इति । (पृ.स.३७८, वै.सि.ल.म.)

"अन्तःकरणस्य रागादिदोषः" इति नागोजीभट्टेन यदुक्तं, तदेव

'अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि।

बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः॥' (श्लो.५७३. वि.चू.) इत्यत्रापि उक्तम्॥

## अधिष्ठानसत्तायाः अध्यस्तविषये आरोपः

बाह्यप्रपञ्चः यदि अवास्तविकः, तर्हि तत्र सत्त्वं = सत्ता कथम् अनुभूयते? इति प्रश्ने, नागोजीभट्टः वदति – "भ्रमे यावद्विशेषदर्शनं बहिःसत्त्वेन प्रतीतिस्तु, तत्र अधिष्ठानगतसत्त्वारोपात्" इति। (पृ.स.३८९, वै.सि.ल.म.)

अत्र विषये विवेकचूडामणिः एवमस्ति –

"आरोपितस्यास्ति किमर्थवत्ता? अधिष्ठानमाभाति तथा भ्रमेण।" इति॥ (श्लो.२३७. वि.चू.)

एवंरीत्या विवेकचूडामणिग्रन्थस्थाः बहवो विषयाः व्याकरणशास्त्रीय-वैयाकरणसिद्धान्त-लघुमञ्जूषाग्रन्थस्थविषयावबोधाय, तद्गतप्रामाण्यनिश्चयाय च बहूपकुर्वन्ति॥

*****

### उपयुक्तग्रन्थाः

वैयाकरणसिद्धान्तलघुमञ्जूषा – वै.सि.ल.म. (प्रथमो भागः) वर्षः १९९०, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी.

विवेकचूडामणिः- वि.चू, वर्षः २००८, भारतीयविद्याभवनम्, मुम्बई.

# सर्वो द्वन्द्वो विभाषयैकवद्भवति

**Dr.K.SHYAMASUNDARA**

Asst. Prof . of VYAKARANA.
The Madras Sanskrit College,
Mylapore, Chennai.600004.
Mob: 9841371467.
E-Mail : srimalashyam@gmail.com

"चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण चार्थे द्वन्द्वसमासो विधीयते । अनेकं सुबन्तं चार्थे वर्तमानं समस्यते, द्वन्द्वश्च समासो भवति इति हि तदर्थः । समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारः इति चार्थाः चत्वारः । तेषु इतरेतरयोगे, समाहारे चैव समासः भवति । समुच्चये, अन्वाचये च सामर्थ्याभावात् समासो न भवति । धवश्च खदिरश्च धवखदिरौ इति इतरेतरयोगस्य, संज्ञा च परिभाषा च तयोः समाहारः संज्ञापरिभाषम् इति समाहारस्य च उदाहरणम् । एवं घटपटौ, घटपटम् इत्यपि ।

**प्रक्रिया**

घटश्च पटश्च तयोः समाहारः इत्यर्थे घट + सु पट + सु इत्यवस्थायां "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण द्वन्द्वसमासे, "कृत्तद्धितसमासाश्च" (१.२.४६) इति सूत्रेण प्रातिपदिकसंज्ञायाम्, "सुपो धातुप्रातिपदिकयोः" (२.४.७१) इति सुब्लुकि, समाहारत्वात् "स नपुंसकम्" (२.४.१७) इति नपुंसकत्वे, समाहारस्य एकत्वात् प्रथमैकवचनविवक्षायां सुप्रत्यये घटपट + सु इति दशायां "अतोऽम्" (७.१.२४) इति सूत्रेण सोरमादेशे, "अमि पूर्वः" (६.१.१०७) इति पूर्वरूपे घटपटम् इति रूपम् ।

घटश्च पटश्च घटपटौ इति इतरेतरयोगद्वन्द्वे वर्तिपदार्थगतद्वित्वसङ्ख्यायाः उद्भूतत्वात् "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" (२.४.२६) इति नियमाच्च , परस्य पटशब्दस्य पुंलिङ्गत्वेन , पुंलिङ्गे प्रथमाद्विवचनविवक्षायाम् औप्रत्यये, घटपट + औ इति दशायां, पूर्वपरयोः"वृद्धिरेचि" (६.१.८८) इति वृद्धौ एकादेशे घटपटौ इति रूपं सिध्यति ।

अत्रास्माकं रूपद्वयमपि इष्टम् । परन्तु एतद्रूपद्वयं, "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण विधीयमानयोः समाहारेतरेतरयोगद्वन्द्वयोः वैकल्पिकत्वे एव सिध्यति । अतः तत्र रूपद्वयसाधनाय परिभाषेयम् आरभ्यते - "सर्वो द्वन्द्वो विभाषयैकवद्भवति" इति । अत्र द्वन्द्वशब्दः द्वन्द्वसमाससमूहपरः। सर्वशब्दश्च सर्वः पटो दग्धः इत्यादाविव अवयवकार्त्स्न्ये विद्यते। तथा च सर्वावयवावच्छिन्नो द्वन्द्वसमाससमूहः विकल्पेन एकवत् = एकवद्भावयुक्तो भवति इति परिभाषायाः अर्थः सिध्यति। समूहस्य

एकत्वात् परिभाषायां द्वन्द्वः इति एकवचनम् इति बोध्यम्। तथा च प्रकृते घट + सु पट + सु इत्यनयोः "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण द्वन्द्वसमासे, प्रकृतपरभाषया विकल्पेन पूर्वम् एकवद्भावे घटपटम् इति रूपं सिद्ध्यति । एकवद्भावाभावपक्षे इतरेतरयोगद्वन्द्वे वर्तिपदार्थगतद्वित्वसङ्ख्यायाः विवक्षया द्विवचनत्वात् घटपटौ इत्यपि रूपं सिद्ध्यति ।

**अत्र शङ्का**

ननु "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण विषयविभागं विना समेषां शब्दानां समर्थानां चार्थे द्वन्द्वसमासस्य विहितत्वात् , उद्भूतावयवभेदविवक्षायाम् इतरेतरयोगद्वन्द्वः अनुद्भूतावयवभेदविवक्षायाम् =समूहविवक्षायां समाहारद्वन्द्वः इति स्वतः सिद्धोऽयं नियमः। तथा इतरेतरयोगे वर्तिपदार्थसङ्ख्यानुसारं द्विवचनबहुवचने, समाहारे समूहस्य एकत्वात् एकवचनं च स्वतःसिद्धानि । सत्येवं परिभाषायाः अस्याः का आवश्यकता ? इति ।

**समाधानम्**

तत्रोच्यते - "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण यद्यपि विषयविभागं विना सामान्यत एव समेषामपि शब्दानाम् इतरेतरयोगे समाहारे च द्वन्द्वसमासो विहितः । परन्तु अग्रे द्वितीयाध्यायस्य चतुर्थपादे "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" (२.४.२) इत्यारभ्य कतिभिश्चित् सूत्रैः समाहारद्वन्द्वस्य एकवद्भावो विधीयते ।तच्च एकवद्भावविधानं समाहारद्वन्द्वविधाने पर्यवसन्नं भवति। तथा च "सिद्धे सत्यारम्भो नियमाय भवति" इति वचनानुसारं "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण सामान्यतया विहितस्य द्वन्द्वस्य समाहारेऽपि सिद्धौ सत्यां, पुनः "द्वन्द्वश्च प्राणि..." इत्यादिप्रकरणेन समाहारे द्वन्द्वविधानं नियमाय भवति। नियमश्च तत्र – प्राण्यङ्गादीनामेव समाहारः नान्येषाम् इति स्यात् । तथा नियमे सति (व्यक्तिप्राधान्ये) घटपटम् इत्यत्र समाहारः एकवद्भावो वा न स्यात् । तत्प्राप्त्यर्थं परिभाषेयम् आवश्यकी। सत्यां त्वस्यां परिभाषायां 'प्राण्यङ्गादीनां समाहार एव' इति नियमसम्भवेन सर्वत्र समाहारद्वन्द्वसिद्धिः इति न दोषः इति।

**पुनरत्र शङ्का**

ननु एवं प्रकृतपरिभाषायाः अङ्गीकारे विकल्पेन सर्वस्यापि द्वन्द्वस्य समाहार-एकवद्भावसिद्धेः "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" (२.४.२) इत्यादिप्रकरणपठितानामपि समाहारस्य वैकल्पिकत्वं स्यात् । तथा सति "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेणैव सर्वत्र विकल्पेन समाहार-एकवद्भावसिद्धेः, पुनः तद्विधानस्य अनावश्यकत्वेन तत्प्रकरणस्यैव वैयर्थ्यं स्यात् इति ।

**समाधानम्**

तत्रोच्यते - यदि सर्वो द्वन्द्वः विभाषया एकवत् स्यात्, तर्हि भवदुक्तरीत्या “द्वन्द्वश्च प्राणि…” इत्यादिप्रकरणस्यापि वैकल्पिकत्वेन वैयर्थ्यं स्यात् । अतः तद्दोषवारणाय “द्वन्द्वश्च प्राणि…” इत्यादिप्रकरणस्य अविषय एव सर्वो द्वन्द्वः एतत्परिभाषाविषयत्वेन परिकल्प्यते । अतो न दोषः इति । तदुक्तं परिभाषेन्दुशेखरे – “द्वन्द्वश्च प्राणि…” इत्यादिप्रकरणाविषयः ‘सर्वो द्वन्द्वः’ इत्यर्थः इति ।

**परिभाषेयं न्यायसिद्धा**

परिभाषेयं न्यायसिद्धार्थानुवादिका न त्वपूर्वा । तथाहि - “चार्थे द्वन्द्वः” (२.२.२९) इति सूत्रेण समाहारे इतरेतरयोगे च अविशेषेण समासो विधीयते । तेन अनुद्भूतावयवभेदविवक्षायाम् = समूहविवक्षायां समाहारद्वन्द्वः, उद्भूतावयवभेदविवक्षायाम् इतरेतरयोगद्वन्द्वः च स्वतः सिद्धौ । तथा इतरेतरयोगे वर्तिपदार्थानुसारं द्विवचन-बहुवचने, समाहारे समूहस्य एकत्वात् एकवचनं च स्वतःसिद्धानि । तस्मात् परिभाषेयम् उक्तसूत्रेण प्राप्तस्य अनुद्भूतावयवभेदविवक्षाप्रयुक्तस्य एकवचनस्यैव अतिदेशं करोति इति कृत्वा तत्सूत्रेणैव लक्ष्यसिद्धेः न्यायसिद्धार्थानुवादिकेयं परिभाषेति फलितम् ।

**अत्र कश्चन सन्देहः**

ननु”चार्थे द्वन्द्वः” (२.२.२९) इति सूत्रेण समाहारे इतरेतरयोगे च सामान्यतः द्वन्द्वस्य लाभे, तत्र समाहारस्य एकत्वात् एकवचनसिद्धौ “द्वन्द्वश्च प्राणि…” इत्यादि-एकवद्भावविधायकं प्रकरणं व्यर्थं सत् ‘प्राण्यङ्गादीनामेव समाहारो नेतरेषाम्’ इति नियमाय भवेत् इति पूर्वमुक्तम्। सत्येवम् एकवद्भावप्रकरण-अविषयस्य “चार्थे द्वन्द्वः” (२.२.२९) इत्यनेन इतरेतरयोगद्वन्द्वस्य एव प्राप्त्या, अविशेषेण द्वन्द्वविधानाभावेन कथमस्य न्यायस्य न्यायसिद्धत्वम् ? इति ।

**समाधानम्**

तत्रेदं समाधानम्– “तिष्यपुनर्वस्वोः…” इति सूत्रस्थबहुवचनग्रहणेनैव पूर्वोक्तविपरीत-नियमाभावस्य ज्ञापनात्, परिभाषायाः न्यायसिद्धत्वं फलत्येव इति । विपरीतनियमव्यावृत्तिद्वारा बहुवचनग्रहणमिदं परिभाषायाः ज्ञापकमपि भवति। तथाहि- “तिष्यपुनर्वस्वोः नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्” (१.२.६३) इति सम्पूर्णं सूत्रम् । अनेन नक्षत्रवाचिनोः तिष्यपुनर्वसूशब्दयोः द्वन्द्वे बहुवचनस्य द्विवचनं विधीयते । तेन तिष्यश्च पुनर्वसू च इति द्वन्द्वसमासे तिष्यपुनर्वसू इति अभीष्टं रूपं सिद्ध्यति। तत्र “तिष्यः एका तारा पुनर्वसू द्वे तारे” इति भाष्यात्, इतरेतरयोगद्वन्द्वे नित्यबहुत्वात् बहुवचनमेव प्राप्नोति। तत्र उक्तसूत्रेण बहुवचनस्य द्विवचनं विधीयते । अत्र ‘प्राण्यङ्गादीनामेव समाहारः’ इति विपरीतनियमे सति, तिष्यपुनर्वस्वोः प्राण्यङ्गादिप्रकरण-अविषयत्वेन समाहारद्वन्द्वो न भवति।

समाहाराभावे न एकवद्भावः।ततश्च उक्तरीत्या बहुवचनस्यैव सत्त्वेन तस्यैव द्विवचनप्रवृत्त्या, व्यावर्त्यस्य अन्यस्य अभावेन बहुवचनग्रहणं व्यर्थं स्यात् ।तद्व्यर्थं सत् "प्राण्यङ्गादीनामेव समाहारः इति विपरीतनियमाभावं ज्ञापयति । तद्द्वारा परिभाषां च ज्ञापयति । विपरीतनियमाभावे 'प्राण्यङ्गादीनां समाहारः एव' इति नियमः सिद्ध्यति।तथा च एकवद्भावप्रकरण-अविषयस्य सर्वस्य "चार्थे द्वन्द्वः" (२.२.२९) इति सूत्रेण समाहार-इतरेतरयोगयोः अविशेषेण द्वन्द्वविधानात् 'उदितमिदं तिष्यपुनर्वसु' इति समाहारद्वन्द्वे एकवचने प्राप्ते, तत्र द्विवचनव्यावृत्त्यर्थं बहुवचनग्रहणं चरितार्थं भवति।एवञ्च विपरीतनियमाभावे ज्ञापिते, परिभाषायाः अस्याः न्यायसिद्धत्वं फलितमेव इति ।

**अत्र शङ्का**

उक्तरीत्या बहुवचनग्रहणेन "चार्थे द्वन्द्वः" (२.२.२९) इत्यस्य वैकल्पिकत्वे बोधितेऽपि 'तिष्यश्च पुनर्वसू च' इत्यस्मिन् लक्ष्ये नक्षत्राणाम् अप्राणित्वात् "जातिरप्राणिनाम्" (२.४.६, प्राणिवर्जजातिवाचिनां द्वन्द्वः एकवद्भवति इत्यर्थः) इति "द्वन्द्वश्च प्राणितूर्य..." इत्यादिप्रकरणपठितेन सूत्रेण 'प्राण्यङ्गादीनां समाहारः एव' इति नियमाङ्गीकारात् नित्यं समाहारद्वन्द्वः एकवद्भावश्चैव स्यात्, न तु इतरेतरयोगद्वन्द्वः । तेन बहुवचनस्य प्राप्तिरेव न इत्यतः, उद्देश्यस्यैव अप्रसिद्धेः बहुवचनस्य द्विवचनविधायकं "तिष्यपुनर्वस्वोः.." इति सूत्रमेव व्यर्थम्। सूत्रस्यैव वैयर्थ्ये सूत्रस्थं बहुवचनग्रहणं कथं वा उक्तनियमाभावे ज्ञापकं भवितुमर्हति ? इति।

**समाधानम्**

तत्रेदं समाधानम् – "यावता न चारितार्थ्यं तावत्सर्वं ज्ञाप्यम्" इति न्यायानुसारेण बहुवचनग्रहणं "जातिरप्राणिनाम्" (२.४.६) इति सूत्रस्य वैकल्पिकत्वमपि ज्ञापयति । ज्ञापिते तु सूत्रस्य वैकल्पिकत्वे एकवद्भावाभावपक्षे बहुवचनमपि भवति । तदा तत्र बहुवचनस्य द्विवचनविधानेन सूत्रं सार्थकं भवति इति । अत्र "जातिरप्राणिनाम्" (२.४.६) इत्यस्य वैकल्पिकत्वं नाम – जातेः प्राधान्यविवक्षायामेव द्वन्द्वे "जातिरप्राणिनाम्" (२.४.६) इति सूत्रं प्रवर्तते । व्यक्तेः प्राधान्यविवक्षायां तु द्वन्द्वे, न प्रवर्तते इत्येवं व्यवस्थितरूपम् इति ज्ञेयम् ।अन्यथा "चार्थे द्वन्द्वः" (२.२.२९) इत्यनेनैव सर्वत्र समाहारस्य विकल्पेन सिद्धेः "जातिरप्राणिनाम्" (२.४.६) इति सूत्रस्यैव वैयर्थ्यं स्यात् ।एवञ्च जातिप्राधान्ये नित्यं समाहारः । व्यक्तिप्राधान्ये तु न तथा नियमः इति भावः । तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू इति द्वन्द्वः यः प्रकृते उदाहृतः सः व्यक्तिप्राधान्ये इति ज्ञेयम् । तेनात्र एकवचनं , बहुवचनम् इत्युभयं प्रसक्तम् । तत्र बहुवचनस्य द्विवचनविधानेन सूत्रं सार्थकं भवति ।

**पुनरत्र शङ्का**

ननु तिष्यादीनां देवतात्वेन प्राणित्वात् "जातिरप्राणिनाम्" (२.४.६) इत्यत्र 'अप्राणिनाम्' इति निषेधस्य कृतत्वात् , तस्य सूत्रस्यैव प्रकृतविषये, अर्थात् तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू इति द्वन्द्वविषये न प्रवृत्तिः।सत्येवं कथं पूर्वोक्तविचारावसरः इति।

**समाधानम्**

तत्रोच्यते– नैते प्राणिनः, अपि तु प्राणाः । "आपोमयः प्राणः"[1] इति श्रुतेः, अद्भिर्विना ग्लायमानप्राणानामेव प्राणित्वम् इति ज्ञायते ।नैते तथा ।अतः एतेषां प्राणित्वाभावात् "जातिरप्राणिनाम्" (२.४.६) इति सूत्रेण अत्र समासे न किञ्चित् बाधकम्।"तिष्यपुनर्वस्वोः ..." (१.२.६३) इति सूत्रे भाष्ये स्पष्टमिदम्। तथा च भाष्यम् – "अथवा नात्र भवन्तः प्राणिनः, प्राणा एवात्र भवन्तः" इति।तद्व्याख्याने कैयटः- "न ह्येतेषु लोके प्राणिव्यवहारः प्रसिद्धः इति भावः ।तदधीनस्थितित्वात् प्राणिनाम् एते एव प्राणाः इत्युच्यन्ते " इत्याह । नागेशभट्टोऽपि – "आपोमयः प्राणः" इति श्रुतेः, अद्भिर्विना ग्लायमानप्राणाः एव लोके प्राणिनः इत्युच्यन्ते । इदमेव पूज्यत्वं भाष्ये अत्रभवच्छब्देन उच्यते इति भावः " इत्याह उद्योते। अनेन भाष्येण तद्व्याख्यानेन च स्पष्टं यत् – नैतेषां प्राणित्वमिति । एवञ्च "जातिरप्राणिनाम्" (२.४.६) इति सूत्रेण अत्र समासे, तस्य पूर्वोक्तरीत्या वैकल्पिकत्वे च साधिते, एकवद्भाव-अभावपक्षे बहुवचनस्य सिद्धत्वात् , तस्य द्विवचनसम्पादनेन "तिष्यपुनर्वस्वोः ..." (१.२.६३) इति सूत्रस्थं बहुवचनग्रहणं स्वांशे चरितार्थम् इति न कोऽपि दोषः इति।

एवमेव पूर्वोक्तरीत्या बहुवचनग्रहणादेव "द्वन्द्वश्च प्राणितूर्य..." इत्यादिप्रकरणस्य "प्राण्यङ्गादीनामेव समाहारः इति विपरीतनियमो न, अपि तु 'तेषां समाहार एव' इत्येव नियमः इति सिद्धम्। तथा च एकवद्भावप्रकरणाविषयस्य "चार्थे द्वन्द्वः" (२.२.२९) इत्यनेन अविशेषेण द्वन्द्वलाभात् एषा परिभाषा फलिता । इति शम् ॥

*****

[1] अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच इति छान्दोग्यश्रुतिः (छान्दोग्योपनिषत् ६-६-५) आपोमय इति अप्शब्दसमानार्थकात् आप्लधातुप्रकृतिक-असुन्नन्तात् आपस्-शब्दात् "तत्प्रकृतवचने मयट्"(५.४.२१) इति मयट्प्रत्यये रूपम् । अप्शब्दात् मयटि तु अम्मयम् इति स्यात्।

## परशीलितग्रन्थाः

पातञ्जलं महाभाष्यम् – प्रदीपोद्योतसहितम् , वाणीविलास प्रकाशन , वाराणसी .

काशिका – न्यासपदमञ्जरीभावबोधिनीसहिता, तारा बुक् एजेन्सी, वाराणसी.

वैयाकरणसिद्धान्तकौमुदी – बालमनोरमातत्त्वबोधिनीशेखरसहिता चौखम्बा सुरभारती प्रकाशनम् ,वाराणसी.

परिभाषेन्दुशेखरः – नागेशगूढार्थदीपिकासहितः , Sarasvathi Power Press, Rajahmundry,1955.

परिभाषेन्दुशेखरः – हैमवतीटीकासंवलितः, संपूर्णानन्दसंस्कृतविश्वविद्यालयः , वाराणसी, १९९१.

परिभाषेन्दुशेखरः – चन्द्रिकाबालबोधिनीसहितः, राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः ,२००४.

परिभाषेन्दुशेखरः – गदाटीकासंवलितः, आनन्दाश्रममुद्रणालयः , पुण्यपत्तनम्, १९७८.

परिभाषेन्दुशेखरः – दुर्गाव्याख्यासहितः, राष्ट्रियसंस्कृतसंस्थानम् , नवदेहली , १९८७.

ईशादिदशोपनिषदः- श्रीशङ्कराचार्यग्रन्थावली, मोतीलाल् बनारसीदास् , वाराणसी.

# ब्रह्मसूत्रेषु ऐतरेयोपनिषदः प्रमेयविचारः

**Dr.V. RAMAKRISHNAN**

Asst. Prof . of Advaita Vedanta.
The Madras Sanskrit College.
Mylapore, Chennai.600004.
Mob 9841021148 / 7010968760.
E-Mail raksaram@gmail.com

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।
गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ॥

उपनिषत्प्रस्थानं भगवद्गीताप्रस्थानं सूत्रप्रस्थानम् इति प्रस्थानत्रयनाम्ना राराजते अद्वैतशास्त्रम् । विद्यमानेषु धर्ममूलकेषु चतुर्ष्वपि वेदेषु विभागद्वयं दरीदृश्यते कर्मकाण्डः ज्ञानकाण्डश्च इति । कर्मकाण्डप्रतिपाद्यमन्त्राः क्रतुषु विनियुक्ताः भवन्ति। भवसागरसंतरणज्ञानहेतुभूताः ज्ञानकाण्डप्रतिपाद्यमन्त्राः विक्षेपावरणशक्तिद्वयविशिष्टाऽज्ञाननिवर्तनोपयुक्ताः भवन्ति । कर्मकाण्डप्रतिपाद्यमन्त्राः यद्यपि कर्मस्वेव विनियुक्ताः अथापि परम्परया चित्तशुद्धिद्वारा मुमुक्षून् उपकुर्वन्ति मोक्षप्राप्तये । सन्ति च उपनिषदः अनेकाः याः ब्रह्मतात्पर्यपर्यवसानभूताः । तथाभूता उपनिषद् प्रतिवेदम् एका द्वे वा स्तः । उपनिषत्सु विद्यमानानां ब्रह्मसमर्पकाणां वाक्यानां विप्रतिपत्तिः यस्मिन् स्यात् तत् विषयवाक्यत्वेन आदाय पूर्वपक्षीकृत्य सुष्ठु विचार्य च ब्रह्मण्येव तात्पर्यम् इति समुपस्थाप्यते शारीरकमीमांसाशास्त्रेऽस्मिन् ॥

यदा किञ्चिद्वाक्यं विषयवाक्यत्वेन समादाय ब्रह्मसूत्रे विचार्यते, तदा अन्यासूपनिषत्सु विद्यमानवाक्यानि तस्य ब्रह्मतात्पर्यसमर्पकत्वे उपोद्बलकानि स्युः । एवं प्रमुखतया विद्यमानदशोपनिषत्सु ऐतरेयोपनिषदः प्रमेयभूतानां वाक्यानां ब्रह्मसूत्रे ब्रह्मणि एव पर्यवसायित्वं तथा उपोद्बलकत्वं च कथम् इति अधिकरणद्वयम् आदाय प्रतिपाद्यतेऽस्मिन्लेखे।

**ज्योतिराद्यधिकरणम्**

**"ज्योतिराद्यधिष्ठानं तु तदामननात्"** (ब्र.सू.२.४.१४) **"प्राणवता शब्दात्"** (ब्र.सू.२.४.१५) **"तस्य च नित्यत्वात्"** (२.४.१६) इति सूत्रत्रयघटितेऽस्मिन् **ज्योतिराद्यधिकरणे** अग्न्यादिदेवताधिष्ठितत्वेनैव वागादीनीन्द्रियाणि प्रवर्तन्ते इति विचारः प्रवर्तते । अत्र इन्द्रियाणि स्वातन्त्र्येण स्वस्वकार्येषु प्रवर्तन्ते उत देवतायाः प्रेरणावशात् प्रवर्तन्ते वा इति संशयः। वागादीनामिन्द्रियाणां स्वस्वकार्यप्रवृत्तिसामर्थ्यात् देवतानुग्रहं विनैव कार्येषु प्रवर्तन्ते। यदि देवताधिष्ठितत्वेनैव इन्द्रियाणां प्रवृत्तिः उच्येत तर्हि इन्द्रियप्रवृत्त्या

अर्थात् श्रवणदर्शनादि-विषयानुभवः, विषयोपभोगो वा देवतानामेव स्यात् , न तु जीवस्य इत्यापतेत् इति पूर्वपक्षः। "अग्निर्वाग् भूत्वा मुखं प्राविशत्" इत्यादिश्रुतिवाक्यैः इन्द्रियादीनि स्वकीय-अधिष्ठातृ-देवतानुग्रहवशादेव कार्याणि निर्वर्तयन्ति। सर्वथा जीवसहवर्तित्वात् इन्द्रियाणां, जीवोऽपि पूर्वजन्मकृतकर्मणां फलोपभोगार्थं शरीरे प्रविष्ट इति, अधिष्ठातृदेवतानुग्रहवशादेव तेषाम् इन्द्रियाणां लब्धप्रवृत्तिसामर्थ्यात् , जीवकर्मफलभोक्तृत्त्वकथनं युक्तं स्यात्। किञ्च उत्कृष्टपुण्यनिचयेन लब्धजन्मानः देवाः श्रेष्ठान् भोगान् भुञ्जानाः जीवशरीरं प्रविश्य निकृष्टफलानि उपभुञ्जते इति कथनमयुक्तम् इति सिद्धान्तः। अपि च देवताप्रेरितान्येव इन्द्रियाणि प्रवर्तन्ते इत्यत्र हेतुरस्ति - **तदामननात्** इति।

**"ज्योतिराद्यधिष्ठानं तु तदामननात्"** (ब्र.सू.२.४.१४) इति प्रथमसूत्रव्याख्यानसन्दर्भे ऐतरेयश्रुतिप्रमाणं प्रदर्श्यते, या च सिद्धान्तम् उपोद्बलयति। **ऐतरेयोपनिषदि** प्रथमाध्यायस्य द्वितीयखण्डे वर्तते इयं श्रुतिः। तत्र सन्दर्भस्तु एवं वर्तते - ईश्वरेण सृष्टाः इन्द्रियाभिमानिन्यः देवताः महार्णवे नाम अविद्याकामकर्मप्रभवे प्रापतन्। ततः क्षुत्पिपासादिकेन च ताः देवताः ईश्वरः संयोजितवान्। अतः क्षुत्पिपासोपशमनार्थं अश्रयस्थानं कल्प्यताम् इति ताभिः प्रार्थितः ईश्वरः तासाम् उपद्रवनिवारणार्थं गो – अश्वादिकम् आनयत्। दृष्ट्वा च एतत्सर्वमपर्याप्तं नः इत्यवदन् देवताः। ततः "ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति। पुरुषो वाव सुकृतम्। ता अब्रवीत् यथायतनं प्रविशतेति" इति। (ऐ .१.२.३) अनन्तरं ताभ्यः पुरुषमानयत्। तं दृष्ट्वा देवताः अतीव शोभनं सर्जनमिति प्रशस्य अतिप्रसन्नाः जाताः। ताः ईश्वरः यथायतनं प्रविशत यूयम् इत्युक्तवान् इति। तदा अयं मन्त्रः पठ्यते एवम् - **"अग्निर्वाग् भूत्वा मुखं प्राविशत् वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन्"।** अग्निः वागिन्द्रियद्वारा मुखं प्राविशत्। वायुः प्राणो भूत्वा नासिकारन्ध्रं प्राविशत्। दिशः श्रोत्रं भुत्वा कर्णौ प्राविशन्। सूर्यः चक्षुरिन्द्रियत्वेन नेत्रे प्राविशत्। ओषधिवनस्पतयः लोमानि भूत्वा त्वचं प्राविशन्। चन्द्रमा मनो भूत्वा हृदयं प्राविशत्। मृत्युः अपानो भूत्वा नाभिं प्राविशत्। तथा जलं वीर्यत्वेन शिश्नं प्राविशत् इति।

इदानीं सूत्रार्थ उच्यते - **"ज्योतिराद्यधिष्ठानं तु तदामननात्"** (ब्र.सू.२.४.१४) अत्र सूत्रे तुशब्दः पूर्वपक्षनिरासार्थः। अग्न्यादिदेवताभिः प्रेर्यते इति अधिष्ठानम् अधिष्ठितमेव वागादिकं चेष्टते। कुतः? तदामननात् तस्य देवताधिष्ठितत्वस्य "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादिश्रुत्याऽभिधानात्। किञ्च "चक्षुषा हि रूपाणि पश्यति" इति श्रुतौ देवताधिष्ठानस्य निषेधाभावात् देवताधिष्ठितत्वबोधकश्रुतेः एतच्छ्रुत्या विरोधो नास्ति। अतः देवताप्रेरितान्येव इन्द्रियाणि प्रवर्तन्ते इति सिद्धान्तः।

**आत्मगृहीत्यधिकरणम्**

**"आत्मगृहीतिरितरवदुत्तरात्"** (3.3.16 **ब्र.सू.**) **"अन्वयादिति चेत्स्यादवधारणात्"** (3.3.17) इति सूत्रद्वयात्मकमिदम् आत्मगृहीत्यधिकरणम्। **"आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत् स ईक्षत लोकान्नु सृजा इति** (ऐ.1.1.1) **"स इमाँल्लोकानसृजत अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः"** (ऐ.1.1.2) इति वाक्यं श्रूयते ऐतरेयके। तत्र आत्मशब्देन परमात्मैव ग्रहीतव्य इति निर्णेतुमिदमधिकरणम्।"आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् स ईक्षत लोकान्नु सृजा" इति (ऐ.1.1.1) वाक्यं अत्र विषयः। तत्र किम् आत्मशब्देन हिरण्यगर्भः अभिधीयते उत परमात्मा इति सन्देहः। अन्यासु उपनिषत्सु यत्र ईश्वरात् सृष्टिप्रतिपादनं दृश्यते तत्र महाभूतसृष्टिरादौ वर्ण्यते। अत्र लोकसृष्टिप्रतिपादनात् आत्मा हिरण्यगर्भः एव। हिरण्यगर्भोऽपि श्रुत्यन्तरे आत्मत्वेन प्रतिपादितो वर्तते। ईश्वरोक्तौ भौतिकसृष्टिकथनं नोपपद्यते। अतः अत्र आत्मा ईश्वरो नेति पूर्वपक्षः।"आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत् स ईक्षत लोकान्नु सृजा" इति। इत्युक्त्वा स एष शरीरमनुप्रविश्य जीवो भूत्वा विचार्य ततः स्वं ब्रह्मत्वेन ज्ञातवान् इत्युक्तः प्रथमः आत्मा ईश्वर एव। छान्दोग्ये यथा आकाशवायू सृष्ट्वा ततः तेजसस्सृष्टिः इति संयोज्य कथनं, तथा अत्रापि पञ्चमहाभूतसृष्ट्यनन्तरं लोकादिसृष्टिः इति योजनीयं भवेत्। अतः आत्मा ईश्वर एवेति सिद्धान्तः।

अस्मिन्नधिकरणे वर्णकद्वयं वर्तते। पूर्वोक्तो विषयः प्रथमवर्णकस्य। इदानीं द्वितीयवर्णकस्य विषयः प्रारभ्यते। बृहदारण्यके **"कतम आत्मेति, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः"** (बृ.आ.4.3.7) इति आत्मशब्देन उपक्रम्य **"स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म"** (बृ.आ.4.4.25) इति आत्मशब्देन उपसंहृतम्। छान्दोग्ये **"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"** (छा.6.2.1) इति आत्मशब्दं विनैव सन्मात्रत्वेन उपक्रम्य "स आत्मा तत्त्वमसि" (छा.6.8.7) इति उपसंहृतम्। अनयोः वाक्ययोः समानार्थकत्वेन विद्यैक्यं निर्णेतुम् अधिकरणमिदम् आरभते। छान्दोग्ये सच्छब्देन उपक्रम्य, सद्वस्तु विस्तरेण प्रतिपाद्यते। बृहदारण्यके **"कतम आत्मा"** इति आत्मशब्दोपक्रमः दृश्यते। अतः एतद्विद्याद्वयं एकं वा उत भिन्नमिति संशयः। सच्छब्दस्य आत्मवाचकत्वं नास्ति, उभयोः (सदात्मशब्दयोः) भिन्नार्थकत्वात् इति। अतः एतद्विद्याद्वयं न समानं, पार्थक्यमेव इति पूर्वपक्षः। यद्यपि सच्छब्दः आत्मानात्मोभयसाधारणः तथापि अन्ते सच्छब्दप्रतिपाद्यः आत्मा एव इत्युक्तत्वात् उपक्रमस्थसच्छब्दप्रतिपाद्योऽपि आत्मैव, एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय, सद्वस्तुपरिज्ञानेन सर्ववस्तुपरिज्ञानमित्युक्तत्वात् सच्छब्दप्रतिपाद्यः आत्मैव। अतः अनेन उपनिषद्द्वयेनापि एकैव विद्या उपदिश्यते।

आत्मशब्देन परमार्थस्यैव ग्रहणमित्यत्र ऐतरेयश्रुतेः उपोद्घलकत्वम् तत्सन्दर्भविवरणञ्च उच्यते - ऐतरेयब्राह्मणान्तर्गत-द्वितीयारण्यकस्य चतुर्थपञ्चमषष्ठाध्यायानां त्रयाणामेतेषां ऐतरेयोपनिषदिति नाम। अत्र केवलं ब्रह्मविद्यायाः निरूपणं क्रियते। गताध्यायेषु अपरब्रह्मणः उपासनायुक्तस्य कर्मणः निरूपणं कृतम्। ततः "**एतत्सत्यं ब्रह्म प्राणाख्यम् ...** इत्यारभ्य **एतस्य प्राणस्यात्मभावं गच्छन्देवता अप्येति**" इत्युक्त्वा देवताप्ययलक्षणः एव परः पुरुषार्थः, एष एव मोक्षः, स च यथोक्तज्ञानकर्मसमुच्चयसाधनेन प्राप्तव्यः, नान्यो मार्गः अस्ति इति केचन अभिप्रयन्ति। तथाभूतज्ञानकर्मसमुच्चयवादिनां मतनिरासार्थम् , आत्मविद्यामात्रविधानार्थम् **"आत्मा वा इदम्"** इत्यादिना अग्रिमग्रन्थस्य प्रारम्भः इति सन्दर्भः। अनन्तरं पुरुषायुषस्य कर्मणा व्याप्तत्वात् "कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः" इति (ई.उ.२) अविद्वद्विषयसंबन्धात् प्रकारान्तरेण तथा भवितुमसंभवाच्च परिहृत्य, वक्ष्यमाणस्यापि आत्मज्ञानस्य पूर्वोक्तश्रुतिप्रतिपादित-आत्मज्ञानतुल्यत्वात् अविरुद्धत्वमेव इत्यस्य सविशेषत्वेन निर्विशेषत्वेन च आत्मविषयकत्वमुक्त्वा खण्डितः वर्तते। इदानीं ब्रह्मात्मैकत्वविद्याप्रदर्शनार्थम् उत्तरो ग्रन्थः आरभ्यते। आत्मनः ईक्षणपूर्विका सृष्टिः - "आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा" इति। व्याप्त्यर्थक 'आप्' भक्षणार्थक 'अद्' सततगमनार्थक 'अत्' धातुभ्यः निष्पन्नो वर्तते आत्मशब्दः। इदं यत् विकारजातं नामरूपकर्मभेदेन नानारूपेण प्रतीयमानम् उक्तं तत् नित्यशुद्धबुद्धमुक्तस्वभावः सर्वशक्तिमान् सृष्टेः प्रागपि क्षुत्पिपासादिसांसारिकधर्मरहितः, अजः, अजरः, अमरः, अभयः, अद्वयरूपश्च आत्मा एक एव आसीत् इति। किमिदानीं स एको न ? इति प्रश्नः। तथा नास्तीति। परं किमर्थम् आसीत् इत्युच्यते ? यद्यपि इदानीमपि एकत्वम् , अथापि कश्चन विशेषोऽस्ति। उत्पत्तेः प्राक् जगदिदम् अव्याकृतनामरूपभेदेन आत्मशब्दैकप्रत्ययगोचरम् आसीत्। इदानीं व्याकृतनामरूपभेदेन, अनेकशब्दप्रतीतिगोचरत्वम् आत्मैकशब्दप्रत्ययगोचरत्वं च विशेषो वर्तते। यथा सलिलात् पृथक् फेनस्य नामरूपाभिव्यक्तिर्नैव आसीत् फेननामरूपव्याकरणात् प्राक्, तदा सलिलशब्द प्रत्ययगोचरमेव फेनकम्। यदा तु सलिलात् पृथक् फेनस्य नामरूपव्याकरणाभिव्यक्तिः तदा सलिलं फेनमिति अनेकशब्दप्रत्ययगोचरम् , एकशब्दप्रत्ययगोचरं च फेनं भवति इतिवत् उपर्युक्तविषयेऽपि ज्ञातव्यं भवति। किञ्च यथा सांख्याः आत्मातिरिक्तत्वेन स्वतन्त्रात्मकं प्रधानं कथयन्ति, यथा च काणादमतावलम्बिनः अणुं प्रवदन्ति, तथा अत्र आत्मातिरिक्तत्वेन सक्रियं निष्क्रियं च वस्तु न किञ्चिदस्ति। औपनिषदसिद्धान्ते आत्मातिरिक्तत्वेन नान्यदस्ति। अस्ति चात्मैव केवलम्। स सर्वज्ञस्वभावत्वात् एकत्वेऽपि ईक्षणमकरोत्। उत्पत्तेः प्राक् यद्यपि कार्यकरणवत्त्वं नास्ति तथापि सर्वज्ञस्वभावत्वात् ईक्षितवान्। मन्त्रवर्णोऽपि श्रूयते - " अपाणिपादो जवनो ग्रहीता" (श्वे. उप.३.१९.) इत्यादिः। अपदोऽपि जवेन गमनम्, तथा पाण्यभावेऽपि ग्रहणसंभवः इति मन्त्रवर्णात्। केनाभिप्रायेण ईक्षणम् ? इत्यत्र श्रुतिः

ईश्वरस्याभिप्रायं कथयति – अहं सर्वप्राणिनां कर्मफलोपभोगार्थं तदाश्रयभूतान् अम्भआदिलोकान् सृजै इति।

अत्र उपनिषत्प्रमेयं वर्तते। **"आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा" इति।**

ब्रह्मसूत्रार्थस्तु एवम् - **"आत्मगृहीतिरितरवदुत्तरात्" (3.3.16 ब्र.सू.)** आत्मगृहीतिः – अस्मिन् सृष्टिवाक्ये आत्मशब्देन परमात्मनः एव ग्रहणम्। इतरवत् – आत्मन आकाशस्सम्भूतः इत्यादिषु इतरेषु सृष्टिवाक्यादिषु यथा आत्मश्ब्देन परमात्मन एव ग्रहणं तद्वदत्रापि। कुतः उत्तरात् - '**स ईक्षत लोकान्नु सृजा**' **(ऐ.उ.१.१.१)** "स इमाँल्लोकानसृजत (**ऐ.उ.**१.१.२) इति ईक्षणपूर्वकस्रष्टृत्वरूपात् उत्तरविशेषणात् । ईक्षणपूर्वकस्रष्टृत्वविशेषणं च परमात्मन्येव मुख्यतया श्रुत्यन्तरेषु अवगम्यते इति॥

## BIBLIOGRAPHY

**CHHANDOGYOPANISHAD** - KAILASH ASHRAM EDITION-2002

**KATOPANISHAD** – SHANKARAGRANTHAVALI, VOLUM VIII, SAMATA BOOKS, MADRAS

**AITAREYOPANISHAD** - GITA PRESS, GORAKHPUR

**BRAMHASUTRA SHANKARABHASHYAM** SHANKARAGRANTHAVALI , VOLUME VII, SAMATA BOOKS, MADRAS.

# नाट्य-नृत्य-नृत्तभेदाः

**Dr. G. SURESH**

Asst.Prof in Sahitya,

The Madras Sanskrit college,

Mylapore, Chennai - 04.

नमस्तस्मै गणेशाय यत्कण्ठः पुष्करायते।
मदाभोगघनध्वानो नीलकण्ठस्य ताण्डवे॥

काव्यं नाम रसभावालङ्कारपूर्णं जनमनोह्लादकं वाक्यकदम्बकम् इत्यशेषविपश्चिज्जन-गणमणिविदितमेव। काव्यं दृश्यश्रव्यभेदाभ्यां द्विधा भवति। काव्यमधिकृत्यार्वाचीनैरानन्दवर्धनाचार्य-भामह-दण्डि-राजानककुन्तक-मम्मटादिभिः सङ्ख्यातीतैराचार्यप्रवरैः नानालङ्कारग्रन्थाः निरमायिषत। परन्तु काव्यशास्त्रमधिकृत्य त्रय एवाचार्याः विश्रुतिमापुः - व्यासमुनिर्नन्दिकेश्वरः भरतमुनिश्च। काव्यशास्त्रं न केवलं दृश्यश्रव्यकाव्यप्रमेयोपपादकं भवति। अपि तु तदुपयोगिनां रससङ्गीतकामशास्त्रप्रभृतीनां सौकुमार्यकलादीनाञ्च निरूपणाधिकृतं भवति।

इदंशास्त्रस्याचार्यत्वेन भरतमुनिपूर्ववर्ती नन्दिकेश्वरः इति सहृदयैरङ्गीक्रियते। परन्तु सांप्रतं लोके नाट्यविषयस्याकरग्रन्थत्वेन समुपलब्धं भरतनाट्यशास्त्रमेव भवति। एवं नाट्यशास्त्रे कर्तृत्वेन वृद्धभरतः - आदिभरतश्च गृह्येते। नाट्यवेदागम-नाट्यशास्त्रभेदाभ्यां तच्छास्त्रग्रन्थद्वयं भवति। तत्र नाट्यवेदागमग्रन्थसङ्ख्या द्वादशसाहस्री, नाट्यशास्त्रस्य षट्साहस्री। भावप्रकाशनं नाम ग्रन्थे एवं भवति -

एवं द्वादशसाहस्रैः श्लोकैरेकं तदर्धतः।
षड्भिः श्लोकसहस्रैर्यो नाट्यवेदस्य सङ्ग्रहः॥ इति।

परन्तु भरतनाट्यशास्त्रस्य दुरूहत्त्वादनेकविषयचयविप्रकीर्णत्वाद्रूपकमधिकृत्य नैकविद्वद्भिः पराक्रान्तम्। तत्र धनञ्जयाचार्येण दशरूपकं नाम ग्रन्थः, तदनुजेन धनिकाचार्येणावलोकव्याख्या चाकारिषाताम्। तद्रीत्या नाट्य-नृत्य-नृत्तभेदविषयादिकं पश्यामः।

ऋग्भ्यः पाठ्यन्तु सामभ्यो गीतमाथर्वणाद्रसान्।
यजुर्भ्योऽभिनयं प्राप्तः नाट्यवेदो हि पञ्चमः॥

इत्यभियुक्तोक्तिप्रकारं नाट्यं वेदत्वेन परिगण्यते। तदनु "अवस्थानुकृतिर्नाट्यम्" इति काव्योपनिबद्धायाः धीरोदात्तादिचतुरवस्थायाः आङ्गिक-वाचिकाहार्य-सात्त्विकादि चतुर्विधाभिनयेन एकरूपताप्रतीतिजनकमनुकरणं नाट्यम्। एवम् भरताचार्यः स्वकीयनाट्यशास्त्रे -

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।

सोऽङ्गाद्यभिनयैर्युक्तं नाट्यमित्यभिधीयते॥ इति समीरयति।

साहित्यमर्मज्ञा अभिनवगुप्तपादास्तु - लौकिकपदार्थव्यतिरिक्तं वृत्तान्तास्वादनरूप-संवेदनसंवेद्यं वस्तु रसस्वभावं नाट्यम् - इति कथयन्ति। किञ्च धनञ्जयाचार्यैः निजग्रन्थे एवमुच्यते - नटादौ रामाद्यवस्थायाः आरोपणप्रवृत्तत्वात् रूपकं यथा मुखचन्द्रः इत्यत्र मुखे चन्द्रत्वारोपेण रूपारोपात्तु रूपकं इति रूपकालकारः भवति। अत्र नाट्य-रूप-रूपकशब्दाः एकस्मिन्नेव नाट्येऽर्थे प्रयुक्ताः सन्ति यथा इन्द्रः - पुरन्दरः - शक्रः इति शब्दास्त्रयोऽपि इन्द्रबोधकाः एकार्थवाचिनः, परन्तु तेषामपि विशेषप्रवृत्तिनिमितभेदः भवति, तथैव नाट्य-रूप-रूपकशब्देष्वपि विद्यते।

किञ्च नाट्ये - नटे रामादिपात्राणामवस्थाया आरोपात् नाट्यं रूपकमेव। एवमवस्थानुकरणत्वात् दृश्यकाव्यं नाट्यम्। तदेव दृश्यत्वात् रूपं - नटे रामादेरारोपाद्रूपकमित्यभिधीयते। धनिकाचार्यस्यापि एवमेवाभिप्रायः। तस्मात् रसाश्रयं नाट्यं नाटकं वा भवति। एवं "अन्यद्भावाश्रयं नृत्यम् " - इति कारिकांशतः नृत्यं नाट्यादन्यदेवेत्यभिप्रयन्ति धनञ्जयाचार्याः। तत्र रसाश्रयनाट्यादितरत् यत् भवति तद्भावाश्रयं नृत्यमिति कथ्यते। भावप्रकाशने ग्रन्थे (१-१२) एवं भवति -

भावस्स्याद्भावनं भूतिरथ भावयतीति वा।

पदार्थो वा क्रिया सत्ता विकारो मानसोऽथवा॥ इति।

एवमेव सङ्गीतदामोदरे -

देवरुच्या प्रतीतो यस्तालमानरसाश्रयः।

सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः॥ इति कथ्यते।

एवं स्थिते डोम्बी - श्रीगदित - भाण – भाणीप्रस्थान- रासककाव्यादयः सप्त नृत्यस्य भेदाः भाणवत्स्युः इत्युक्तेः तेषां मध्ये भाणस्य दशविधरूपके ग्रहणादितरभेदानां रूपकत्वं किमर्थं न भवेत् इति रूपकान्तरसत्वाद्रूपकदशविधावधारणाया अनुपपत्तिर्भवेत् - इति कारणात् तद्बोधार्थं नाट्यनृत्ययोः एवं नृत्तभेदः च दशरूपककारैरेवमुच्यते।

यद्यद्रसात्मकं तत्तद्वाक्यार्थाभिनयात्मकम्। यद्यद्भावाश्रयं तत्तत्पदार्थाभिनयात्मकम् - इति भावप्रकाशोक्तरीत्या ज्ञायते। एवमिदमवधेयम् - नाट्यं नटकर्म - नृत्यं नर्तककर्म भवति। अभिनवगुप्तपादोऽपि नटः प्रयोक्ता सन् प्रयोज्यस्य रूपं धरति - परन्तु नर्तक एवं न करोति - तस्मान्नटः

नर्तकाद्भिन्नः इति मनुते। एवमेव नृत्यनृत्तयोः गात्रविक्षेपादौ समानेऽपि पदानुकारात्मकं नृत्ये दृश्यते ताललयाश्रयनृत्ते तन्नास्ति।

एवं च "नट अवस्पन्दने" (अवस्पन्दनं नाम किञ्चिच्चलनमित्यर्थः) इति धातोः ष्यञ्प्रत्यये कृते नाट्यम् इति रूपं - ण्वुल् प्रत्यये कृते नाटकम् - कृतेऽचि नटः - ल्युट्प्रत्यये नटनम् इति रूपं सिद्ध्यति। एवं "नृती गात्रविक्षेपे" इति धातोः क्यप्प्रत्यये कृते नृत्यं इति रूपं - क्तप्रत्यये नृत्तं - ल्युटि नर्तनं - ण्वुलि नर्तक इति रूपम् - अच्प्रत्यये नर्तः इति रूपं सिद्ध्यति।

किञ्च वाक्यार्थाभिनयः नाट्ये रसाश्रयत्वात् - नृत्ये पदार्थाभिनयः भावाश्रयत्वात् - नृत्तेऽभिनयाभावः ताललयाश्रयत्वात्। एवं नाट्ये किञ्चिच्चलनमेवेति विद्यमानकारणात् सात्विकं बाहुल्यमस्ति। नृत्ये गात्रविक्षेपादाङ्गिकं बाहुल्यम्। नृत्तेऽपि गात्रविक्षेप एवाङ्गिकं बाहुल्यं किन्त्वभिनयहीनता। एवमपि नाट्यं काव्यात्मकं भवतीति कारणेन श्रोतुमवलोकयितुं च शक्यम्। नृत्यं दर्शनीयमेव, न तु श्रवणीयं काव्यसंबन्धाभावात्। एवमेव नृत्तमपि।

तस्माद्धेतोः श्रीगदितादयः नृत्यभेदाः भवन्ति, न तु नाट्यभेदाः। तेन नाट्येऽऽस्वादनं भवति - नृत्य आह्लादनं - नृत्ते तु मनोरञ्जनम्। किञ्च रसपूर्वावस्था भावाः - भावपूर्णावस्था रसाः भवन्ति। भेदापगमे सत्यपि उद्बुद्धमात्रो भवति भावः - परिपुष्टो भवति रसः इति निश्चप्रचं भवति। नाट्ये कथापात्राणां सर्वाङ्गीणचित्रणेन रसपरिपुष्टतायाः भावचरमपरिपोषणावधिः दृश्यते, नृत्ये तु भावाभिव्यञ्जना एव। नृत्ते चञ्चत्पुटादि तालानुसारेण मात्रानुसरणं लयानुसारेण गतिः, एवं ताललयनियमितगात्रविक्षेपमात्रं भवति। तस्मान्नृत्तं गानक्रियमात्रानुसारि - वाद्यतालानुसारि च भवति। तस्मान्नाट्यनृत्यनृत्तभेदः स्पष्टतया ज्ञातुं शक्यते। नाट्यस्य उदाहृतिः अभिज्ञानशाकुन्तलम् - श्री उदयनशङ्करस्य भावनृत्यं नृत्योदाहरणं भवति इति सुप्रसिद्धम्। एवं डोम्बिका-भाण-प्रस्थान-षिङ्गक-भाणिका-रामाक्रीड-हलीशक-रासकादयः नृत्तप्रबन्धाः भवन्ति।

॥ इति शम् ॥

*****

# वास्तुशास्त्रम्

**डा. अखिलेश्वर मिश्रः**

ज्योतिषविभागाध्यक्षः

मद्रपुरी संस्कृत महाविद्यालयः

स्थापत्यं वास्तुशास्त्रं वा सामान्यतः ललितकलायाम् अन्तर्भवति। यथा चित्रकला, मूर्तिकला, साहित्य-सङ्गीत-नाट्यशास्त्रवत्। किन्तु सनातनहिन्दुपरम्परायाम् इदं शास्त्रं तु ज्योतिषशास्त्रेण कल्पशास्त्रेण वा समुद्भूतम् अस्ति ।

स्थापत्यकला भवननिर्माणकला अस्ति । सामान्यतः आदिममानवः यायावरः आसीत् , शनैः शनैः सः नागरिकः अभूत् । मानवसभ्यतायाः विकासेन परम्परया च जननिवासेष्वपि विकासः दृश्यते, यथा आदिमानवः वन्यगुहाशयेषु निवसन्नासीत् , कालान्तरेषु ग्रामेषु नगरेषु वा निवासी अभूत् ।

तदानीन्तनकालेषु मानवस्य संघटितजीवनस्य श्रीगणेशः अभूत् , तेन कारणेन ग्राम- पुर-पत्तनानाम् रचना अजायत । गृहनिर्माणं तु सुविकासितसभ्यतायाः एकः प्रमुखः स्कन्धः दृश्यते । ग्रामसंनिवेशस्य परसन्निवेशस्य वा विविध- अंग- उपांगजानां च विकासः संदृश्यते च । भवननिर्माण-विधिषु भूचयन- भूमापन- भूसंस्कारादि – तत्त्वानाम् उदयः जायते ।

ऋग्वेदः एव प्रथमः ग्रन्थः अस्ति, यस्मिन् अर्चावास्तु ( यज्ञशाला-यज्ञवेदिका वा ) लौकिक-वास्तु वा (गृह- पुरनिर्माणादि) सुवर्णितमस्ति । वस्तुतः ऋग्वेदे, परवर्तिषु साहित्येषु वाङ्मयेषु वा प्रचुरतमाः सामग्र्यः उपलब्धाः सन्ति, अनेन उभयविधवर्णितस्थापत्यस्य सुरुचिकरं ज्ञानं दृश्यते । सामान्यनागरिक-आवासगृहाणि राजप्रासादांश्च विहाय तात्कालिक वाङ्मयेषु त्रिभूमिकप्रासादादीनां (Three storey palaces), सहस्रस्तम्भ सहित सहस्रद्वारयुक्तसभाकक्षाणाञ्च उल्लेखः दृश्यते । तत्रैव ग्राम नगर सन्निवेशस्य विवरणमपि लभ्यते ।

वैदिकस्थापत्यस्य नानाविध तत्त्वस्वरूपाणि परवर्ति-भारतीय स्थापत्येषु उपबृंहितानि सन्निविष्टानि च सन्ति। तत्रैव विषयवस्तु इतर-अनेकप्रतीक-अलङ्करणानि च संमिलितानि दृश्यन्ते । वैदिकेसाहित्येषु या भक्ति-उपासना बीजात्मिका आसीत् , सैव परवर्ति वाङ्मयेषु पल्लवितानि आगतानि ।

कालान्तरेषु कलात्मकरुच्याम् अभिवृद्धिवशात् मन्दिर-स्थापत्यस्य स्वरूपमपि संवर्द्धितं दृश्यते, यथा मूर्तिस्थापनास्थलस्य गर्भगृहस्य वा परितः परिवेष्टनानन्तरं चतुर्दिक्षु प्रदक्षिणापथस्य विकाशः दृश्यते, गर्भगृहस्य बहिः आच्छादित-प्रवेश-द्वारस्य मुख-मण्डपस्य निर्माणारम्भः दृश्यते । स्थितिरियम् विक्रमाब्दस्य प्रथम-शतकात् पूर्वमेव दृढा जाता । शनैः शनैः गर्भगृहस्य उपरि शिखर-निर्माणम्, सम्मुखे

मण्डप- अर्धमण्डप- महामण्डपानां च विधान-क्रमः दृश्यते । कालान्तरेषु मन्दिरस्थापत्यस्य शास्त्रीय आधारः निर्मितः । तेन शास्त्रीय-आधारेण विक्रम-प्रथम-शतकात् आरभ्य इदानीमपि मन्दिर-रचना क्रियते। ऋग्वेदेषु प्रतिमा सम्बन्धि-उल्लेखः दृश्यते । तदनन्तरं बौद्धानाम् जैनानां च "स्तूप" निर्माणस्य परम्परा समागता । महान् मौर्य-सम्राट्-अशोकस्य (२७२-२३२ ईसा पूर्व) काले अनेकानेकानां स्तूपानां रचना दृश्यते । मन्दिरे निर्माणार्थं उचित भूचयनस्य उल्लेखः गृह्यसूत्रेषु, ततः पौराणिकग्रन्थेषु च वर्तते । यथा मन्दिर-निर्माणाय उत्तमस्थलेषु प्रायः समुद्रतटः, सरित्तटः, सुदरम् उपवनं, पर्वतीय-प्रदेशाः एव मनोहर पवित्र-शान्त-वातावरणेन च युक्ताः भवन्ति, अत एव मन्दिर-निर्माणार्थं आवश्यक-सामग्री-संग्रहः चतुर्विध निर्माता स्थपतिः श्रमिकाः च एतेषां वर्णनं मानसार शिल्परत्न काश्यपशिल्प मयमतादि-वास्तुशास्त्रीयग्रन्थेषु दृश्यते । मन्दिराणि तु देवानामालयः निवासभूमिश्च भवति। अत एव सर्वसाधारण-जनानां वास-भूम्यपेक्षया देवालयानां सौन्दर्यं चिरस्थायित्वं च विशेषण ध्यातव्यं भवति ।

प्राचीन भारतवर्षेषु तिस्रः शैल्यः (विधयः प्रकाराः वा) विकसिताः दृश्यन्ते। ताः सन्ति - नागर-शैली, बेसर-शैली, द्राविड-शैली। नागर शैल्याः विकास-भूमिः उत्तरभारतेषु अस्ति। बेसर (द्वयस्त्रशैलि) मध्यमभारतेषु विकसिता अस्ति। तृतीया शैली द्राविडशैली अस्ति ,एषा शैली दक्षिण भारतीय-प्रदेशेषु विकसिता दृश्यते । नागरशैल्याः प्रमुखाः आचार्याः शम्भु गर्ग काश्यपादयः आचार्याः सन्ति। वास्तुशास्त्रस्य उद्भावकेषु विश्वकर्मा तु देवानां स्थपतिः देववास्तुप्रवर्तको वा अस्ति। मयासुरः असुरवास्तु प्रवर्तकरूपेण प्रसिद्धः अस्ति । भारतवर्षेषु स्थापत्य-विषयिके उभे शैल्यौ सहैव विकसिते अभूताम् ।

वास्तुशास्त्रीय-आकरग्रन्थेतर-ग्रन्थेषु वैदिकवाङ्मयः, पुराणानि, विशेषतः - अग्निपुराण - विष्णुधर्मोत्तरपुराणे, आगम ग्रन्थाः – तन्त्रग्रन्थाः, रामायणं - महाभारतम् - अष्टाध्यायी - कौटिलीयमर्थशास्त्रं - जैन ग्रन्थाः- बौद्धग्रन्थाः- बृहत्संहिता इत्यादयः सन्ति ।

औत्तरीय नागरपरम्परान्तर्गत मुख्य-वास्तुशास्त्रीय-ग्रन्थेषु सूत्रधारमण्डनम् , विश्वकर्मवास्तुप्रकाशः समराङ्गणसूत्रधारः, वास्तुरत्नावली इत्यादयः सन्ति । दाक्षिणात्य द्राविडपरम्परायां, विश्वकर्मीयशिल्पः, मयमतम् , मानसारः, काश्यपशिल्पः , अगस्त्यसकलाधिकारः, शिल्पसंग्रहः, शिल्परत्नं, चित्रलक्षणञ्च सन्ति।

एतान् मुख्य ग्रन्थानतिरिच्य वास्तुशास्त्रसंबन्धिनाम् अनेकग्रन्थानां प्रणयनमभूत् , तेषु अनेकाः ग्रन्थाः लुप्तप्रायाः सन्ति । केचन उपलब्धाः सन्ति , केषांचन ग्रन्थानामन्यत्र नामोल्लेखः एव उपलभ्यते । वास्तु-विषयक-सुविशालतम-सहित्यम् नष्टप्रायमस्ति। अस्माकं पुरातात्विकस्मारकाणाम् , प्राचीनमन्दिराणाम् , प्राचीनमूर्तिकलानाञ्च, येन केन प्रकारणेन संरक्षित वास्तु-आकृति-दर्शनेन जायते, यत् प्राचीनभारतेषु हैन्दवीयानां स्थापत्य-तन्त्रं कीदृशम् सुविशालतमं विकसितमासीत् ।

# द्वैतमतानुसारेण प्रमाणस्वरूपम्

—डा. पि.पि. श्रीधरोपाध्यायः

Asst Prof of Nyaya &
Principal Investigator - Ashtadashi Project,
The Madras Sanskrit College, Chennai- 600004

मानाधीना मेयसिद्धिः इति वचनानुसारेण सर्वे दार्शनिकाः स्वस्वसिद्धान्तप्रमेयं प्रमाणेन साधितवन्तः। प्रमाणसिद्धवस्तुन्येव निश्शङ्कप्रवृत्तिः समीचीनता च भवतीति सर्वैरपि विदितमेव। प्रमाणस्वरूपे दार्शनिकानां मतभेदे सत्यपि तत्स्वरूपानङ्गीकारे कारणं न पश्यामः। तत्र द्वैतमतानुसारेण प्रमाणस्वरूपं विभागश्च एवमस्ति। प्रमाणानां स्वलक्षणं प्रवक्ष्यामि इति प्रतिज्ञया आचार्याः सूचितवन्तः।

यथार्थं प्रमाणम्। यथाशब्दस्य योग्यता-वीप्सा-पदार्थानतिवृत्ति-सादृश्यरूपार्थचतुष्टयवत्त्वात् तेषां मध्ये वीप्सायाः शब्दधर्मत्वेन प्रकृते अयोगात्। योग्यतायाश्च अतीन्द्रियप्रमायाम् अव्याप्तेः सादृश्यार्थकत्वमपि यथाशब्दस्य न सम्भवति। "यथाऽसादृश्ये" इत्यत्र सादृश्यान्यार्थकयथाशब्दस्यैव समासविधानात्। अपि च अर्थात्यन्तसादृश्यस्य ज्ञानादौ असम्भवाच्च। अतः अनतिक्रमार्थकत्वं यथाशब्दस्येति वक्तव्यम्। अर्थशब्दः अर्यते ज्ञायते इति व्युत्पत्त्या वस्तुपरः। ऋ धातोः गत्यर्थत्वेन ज्ञानार्थत्वात् अर्थशब्दः ज्ञेयवाची। येन प्रकारेण अवस्थितं तथैव विषयीकारि ज्ञेयाव्यभिचारि यथार्थमिति।

अनतिक्रमार्थकयथाशब्दस्य स्वीकारेऽपि प्रश्नः भवत्येव। अनतिक्रमः प्रातः गार्हपत्याहवनीययोः जुहुयादित्यत्र होमद्वयस्य समानकालत्ववत् ज्ञानज्ञेययोः समानकालत्वम् , आहोस्वित् यथा कौशाम्बि देवदत्तः व्याघ्रसूकरौ अपश्यत् इत्यत्रेव समानदेशत्वम्। समानकालत्वे तु ज्ञानज्ञेययोः समानकालत्वाभावात् अतीतानागतगोचरयथार्थज्ञाने अव्याप्तिः। समानदेशत्वे च अहं सुखी इत्यादि सुखादिज्ञाने विषयसमानदेशत्वस्य सत्वेऽपि बाह्यघटादिज्ञाने अभावेन अव्याप्तिः इति। तत्र एवं समाधानं - यद्देशकालयोः यद्वस्तु यथा वर्तते तथैव तद्विषयीकारित्वम् अनतिक्रमो विवक्षितः। तथा च यथावस्थितमेव अर्थं विषयीकरोति इति अतीतादिज्ञानमपि प्रमाणम्।

ज्ञेयमनतिक्रम्य वर्तमानं प्रमाणमित्युक्तम्। तर्हि ग्रामरूपज्ञेयानतिवृत्तित्वात् गमनमपि यथार्थं स्यादिति चेत् - यथा पितरि साधु इत्युक्ते साधुत्वं स्वीये पित्रादौ पर्यवसति। न तु यत्किञ्चित् पित्रादौ। तत्

कस्य हेतोः ? तत्र पित्रादिशब्दानां सम्बन्धित्वादेव ज्ञायते। तथा प्रकृतेऽपि ज्ञेयशब्दस्य सम्बन्धिशब्दत्वात् स्वज्ञेयं नातिवर्तते यत् तत् प्रमाणम् इत्युक्तं स्यात्। गमनादिना ग्रामः न ज्ञेयः इति गमनं न यथार्थम्।

प्रमीयते अनेन इति प्रमाणम्। भावे ल्युट् "करणाधिकरणयोश्च" इत्यनेन भावकरणार्थयोः ल्युटो विधानात् भावार्थे ल्युट् प्रत्यये सति यथार्थज्ञानं प्रमाणम्। करणार्थे ल्युट् प्रत्यये सति यथार्थज्ञानसाधनं प्रमाणम्। भावकरणयोरिव अधिकरणेऽपि ल्युट् प्रत्ययस्य विधीयमानत्वेऽपि अधिकरणे प्रमाणशब्दस्य प्रयोगाभावात् प्रमाणशब्दप्रवृत्तिः न भवति। विप्राः प्रमाणम् इत्यत्रापि ज्ञानरूपप्रमां प्रति विप्राणां स्वतन्त्रकर्तृत्वात् अधिकरणत्वाभावात् विप्राणां ज्ञानं वाक्यं वा प्रमाणमिति कृत्वा विप्राः प्रमाणमिति उपचारः। यथा कटे शेते इत्यत्र शयनरूपक्रियां प्रति आश्रयः यः कर्ता पुरुषः तद्धारणक्रियां प्रति आधारः कटः तत्र अधिकरणसंज्ञा भवति। तद्वत् अत्रापि ज्ञेयविषयीकारित्वं ज्ञान इव करणेष्वपि साक्षादेव। ज्ञाने उपाधितया। करणे तु सम्यग्ज्ञानसाधनतया परम्परया ज्ञेयविषयीकारित्वम् अस्त्येव। उक्तं हि सुधायां - ज्ञानविषय एव हि करणानां विषयः। न हि किमपि अविषयीकुर्वन्ति एतानि ज्ञानं जनयन्ति, नाप्यन्यविषयाणीति।

प्रमाणं द्विविधं - केवलम् अनुप्रमाणञ्चेति। तत्र यथार्थज्ञानं केवलम्। तत्साधनम् अनुप्रमाणम्। केवलमपि ईश-लक्ष्मी-योगि-अयोगिभेदेन चतुर्विधम्। अनुप्रमाणमपि प्रत्यक्षानुमानागमभेदात् त्रिविधम्। यथार्थं प्रमाणम् इति वचनानुसारेण अन्येषां प्रमाणस्वरूपविषये उक्तं लक्षणं निराकृतं भवति।

1. तत्र प्रमासाधनं प्रमाणमिति भाट्टाः। प्रमाशब्देन अर्थगतं ज्ञाततापरपर्यायं प्राकट्यमेव उच्यते। तेषामभिप्रायः एवमस्ति - ज्ञानम् अतीन्द्रियम्। ज्ञानजन्या ज्ञातता प्रत्यक्षा। आदौ अयं घटः इति प्रत्यक्षम्। ततो घटे ज्ञाततायाः उत्पत्तिः। सा च ज्ञानजन्यविषयवृत्तिपदार्थान्तरम्। इन्द्रियव्यापारानन्तर-भाविना ज्ञानेन घटादिविषये प्राकट्यादिपदवेदनीयः ज्ञातताख्यः अतिशयः जायते। ततश्च ज्ञातो घटः इति ज्ञाने विषयविशेषणत्वेन ज्ञाततायाः स्फुरणात् प्रत्यक्षमेव प्रमाणम्। ज्ञाततया च लिङ्गेन ज्ञानम् अनुमीयते। इयं ज्ञातता घटत्ववति घटत्वप्रकारकज्ञानजन्या ज्ञाततात्वादिति। तादृशज्ञाततारूपप्रमासाधनं प्रमाणमिति। तत्रोक्तं - ज्ञानव्यतिरिक्तप्रमायां प्रमाणाभावादिति। अर्थनिष्ठप्रमायाः ज्ञाततायाः अभावेन लक्षणं न समीचीनम्। यदप्युक्तं ज्ञातो घटः इति ज्ञानजन्यज्ञातता विषयधर्म इति। तत्रापि ज्ञानमेव प्रमेयविशेषणतया प्रतीयते। अयं घटः इति प्रथमज्ञाने शुद्धः एव अर्थः अवभासते। न तु ज्ञातताविशिष्टः। तदानीं तस्य अजातत्वात्। ज्ञानं ज्ञाततामुत्पाद्य पुनः ज्ञातताविशिष्टार्थं विषयीकरोतीत्यङ्गीकारे विरम्य

व्यापारप्रसङ्गः। अतः ज्ञातो घटः इति प्रत्यक्षस्य ज्ञानविषयकत्वेन अन्यथासिद्धतया ज्ञातताविषयकत्वं नास्ति।

2. अविसंवादिविज्ञानं प्रमाणमिति सौगतोक्तमपि न युज्यते। अर्थशब्देन शुद्धं वस्तु गृह्यते। अर्थजन्यं ज्ञानं निर्विकल्पकम् इति अङ्गीकारात्। अर्थजत्वरूपस्य अविसंवादस्य विशिष्टज्ञानरूपस्मृतौ अभावात् अव्याप्तिः। अर्थे सत्येव तद्विषयकानुभवः भवति। स्मृतौ च केवलार्थस्मरणमेवेति अर्थजत्वाभात् अव्याप्तिः।

3. स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणमिति जैनोक्तमपि न युज्यते। स्मृतिविषयार्थेषु अपूर्वत्वं नास्तीति स्मृतौ अव्याप्तिः। सोऽयमिति स्मृतौ अनुभवे अविद्यमानं तत्तादिकम् अस्तीति यदि स्मृतेरपि अपूर्वार्थग्राहकत्वम् , तदा अपूर्वग्रहणेन स्मृतिव्यावर्तनासम्भवात् अर्थव्यवसायात्मकत्वमेव लक्षणमस्तु। अर्थविशेषणेन अपूर्वत्वेन प्रयोजनं नास्ति। यदपि धारावाहिकज्ञानस्य अर्थव्यवसायात्मकत्वात् तदेव व्यवच्छेद्यम् अपूर्वग्रहणेन इत्युक्तं तदपि न समीचीनम्। विश्वस्य क्षणिकत्वमङ्गीकृत्य सप्तभङ्गीवादः समर्थितः परैः। तेन ज्ञायते यत् धारावाहिके अपि अयं घटः इति उल्लेखात् तस्य च पूर्वक्षणे असत्त्वात् पूर्वोत्तरज्ञानविषयीभूतवस्तुनो भिन्नत्वात् धारावाहिकस्यापि अपूर्वार्थविषयकत्वमस्तीति। तथा च अपूर्वग्रहणं व्यर्थमिति। अतः अन्यमतोक्तं लक्षणं स्मृतौ अभावात् तत्प्रामाण्यसमर्थनार्थं यथार्थं प्रमाणम् इत्युक्तम् आचार्यैः।

*****

# काव्यस्यात्मा ध्वनिः

**K.V.SURYAPRAKASH**
Research Assistant
Sanskrit Academy
(Adarsh Shodh Sansthan)
Osmania University
Hyderabad - 500 007
Phone - 9866498906
sanskritsurya@gmail.com

ध्वनिशब्दो बहुधा निरुच्यते । निर्वचनानुसारं चास्य बहवोऽर्था गृह्यन्ते । पञ्चधा निर्वचनेन पञ्चापि ध्वनिसम्बद्धा अर्था गृह्यन्ते । तद्यथा - (1) ध्वनि यः स व्यञ्जकः शब्दो ध्वनिः । (2) ध्वनति ध्वनयति वा यः स व्यञ्जकोऽर्थः ध्वनिः । (3) ध्वन्यते इति ध्वनिः । यद् ध्वन्यते इत्यनेन रसालंकार वस्तुरूपं व्यङ्ग्यार्थत्रयम् उपतिष्ठति । (4) ध्वन्यते अननेति ध्वनिः इत्यनेन व्यञ्जनादिशक्तीनां ग्रहणम् । (5) ध्वन्यतेऽस्मिन्निति ध्वनिः इत्यनेन व्यङ्ग्यार्थप्रधानं काव्यमपि संगृह्यते । एवं ध्वनिशब्देन व्यञ्जकशब्दस्य, व्यञ्जकार्थस्य, व्यङ्ग्यार्थस्य, व्यञ्जनाव्यापारस्य, व्यङ्ग्यप्रधानकाव्यस्य च ग्रहणं संजायते ।

**ध्वनेः स्वरूपम्** –

वाच्यार्थापेक्षया व्यङ्ग्येऽर्थे मुख्ये सति ध्वनिरिति कथ्यते । तथाविधं च काव्यं सर्वोत्कृष्टं मन्यते ।

इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।[1]

वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम् ॥[2]

आनन्दवर्धनाचार्यो ध्वनिं लक्षयति -

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथिताः ॥[3]

यत्र शब्दार्थौ स्वार्थं गौणरूपेणोपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यञ्जयतः तदा ध्वनिः । तथाविधं काव्यं ध्वनिः ध्वनिकाव्यं वा निगद्यते । शब्दार्थयोरेकस्य व्यञ्जकत्वे तदन्यस्य सहकारित्वं प्रतिपद्यते ।

---

[1] का.प्र.1.4

[2] सा.द.4.1

[3] ध्वन्यालोक – 1.13

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।

एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥ [1]

वाच्यार्थातिरिक्तः को ध्वनिः व्यङ्ग्योऽर्थो वेति जिज्ञासायां ध्वनिकारेण स्फुटीक्रीयते यत् कामिनीलाविण्यमिव यत् प्रसिद्धातिरिक्तम् अन्यदेव किंचित् प्रतीयते । वाच्यातिरिक्तं व्यङ्ग्यरूपं स ध्वनिः ।

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।

यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गासु ॥ [2]

एतदाश्रित्यैव लावण्यलक्षणमपि प्रस्तूयते यत् -

मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा ।

संलक्ष्यते यदङ्गेषु तल्लावण्यमिहोच्यते ॥

इयं व्यङ्ग्यार्थबोधनक्षमतैव प्रतिभावैशिष्ट्येन महाकवीनां यशः प्रसारयति । व्यङ्ग्यार्थाभिव्यक्तिरेव महाकवित्वस्य निकषः । अतो ध्वनिकृतोच्यते -

सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम् ।

अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥ [3]

व्यङ्ग्यार्थस्य तथा वैशिष्ट्यं यथैष नीरसं सरसम्, असुन्दरं सुन्दरम्, अमधुरं मधुरं जनयति।

ध्वनिसिद्धान्तस्य स्थापना व्याकरणं, विशेषतो भर्तृहरिकृतं वाक्यपदीयम् आश्रित्य वर्तते। वाक्यपदीये नादस्फोटयोः स्वरूपं निरूप्यते -

यः संयोगविभागाभ्यां करणैरुपजन्यते ।

स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ॥ [4]

तत्रोच्चारणावयवानां संयोगेन विभागेन च यः शब्द उत्पद्यते स स्फोटः, अन्ये च शब्दजाः शब्दा ध्वनिशब्दवाच्याः । घण्टानादिषु अनुरणनरूपः शब्दो यथा, तथैव शब्दजो व्यङ्ग्योऽर्थो ध्वनिरित्युच्यते । स्फोटनादयोः व्यङ्ग्यव्यञ्जकसम्बन्धो मन्यते, तथैव काव्येऽपि ध्वनेर्व्यञ्जकत्वं प्रतीयमानस्यार्थस्य च व्यङ्ग्यत्वं सिध्यति ।

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।

---

[1] सा.द. 2.18

[2] ध्वन्यालोक.1.4

[3] ध्वन्यालोक.1.6

[4] काव्य.1.103

व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥ [1]

नादैरहितबीजायां बुद्धौ अन्त्यवर्णश्रवणेन समं शब्दस्य रूपमवधार्यते । ध्वनिरेव शब्दस्वरूपं प्रकाशयति ।

नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ [2]
प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥ [3]

स्फोटव्यञ्जका वर्णा ध्वनिनाम्ना व्यवह्रियन्ते, एवं व्यञ्जकशब्दर्थयोः ध्वनित्वं सिध्यति। लोचनकृता अभिनवगुप्तेन ध्वनिः पञ्चस्वरूपार्थं व्याकरणस्य ऋणित्वं स्वीक्रियते। अत एव आनन्दवर्धनाचार्येण मम्मटेन च वैयाकरणप्रशंसायाम् उच्यते -

"प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम् । ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति" ।[4]

बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ।[5]

**ध्वनिरात्मा काव्यस्य** –

अभिधा-लक्षणा-व्यापारानन्तरं व्यञ्जना वृत्तिः स्वीक्रियते। व्यञ्जनायाः प्राधान्येन काव्ये कल्पनायाश्चिन्तनस्यानुभूत्यादितत्त्वानां च समावेशोऽभूत् । कल्पनाया अभावे लक्षणाया व्यञ्जनाया वा प्रवृत्तिर्न प्रसरति। नानुभूतिं विना भावावेशः, भावावेशमन्तरेण न लक्षणा व्यञ्जना वोद्भवति। व्यञ्जना-शक्तिः काव्ये प्रभविष्णुतां रमणीयतां च सन्निवेशयति । तदैव काव्ये रमणीयत्वं जायते ।

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।[6]

---

[1] वाक्य.1.98
[2] वाक्य.1.85
[3] वाक्य.1.84
[4] ध्वन्यालोक.1.13
[5] काव्यप्रकाश.1.4
[6] शिशु.4.17

तादृशी रमणीयता काव्ये व्यञ्जनाशक्तेः ध्वनेर्वा संजायते । यथा रमणीशरीरे लावण्यम् , मेघे विद्युत् , चन्द्रमसि ज्योत्स्ना, उषसि ज्योतिर्वाऽन्तर्निहिता, तथैव काव्ये ध्वनेरधिष्ठानम् । ध्वनितत्त्वं न काव्यस्यावयवरूपम् अपि तु अवयविरूपेण आत्मरूपेण वा प्रतितिष्ठति ।

काव्यशास्त्रे अभिधा लक्षणा व्यञ्जना चेति तिस्रो वृत्तयः स्वीक्रियन्ते । अभिधा वाच्यार्थप्रधाना, लक्षणा लक्ष्यार्थप्रधाना, व्यञ्जना व्यङ्ग्यार्थप्रधाना च । व्यञ्जनाशक्तेः स्वीकरणे ये दोषा विविधैः शास्त्रज्ञैरुद्भाविताः ते दोषा आनन्दवर्धनेन ध्वन्यालोके मम्मटेन च काव्यप्रकाशे निरस्ताः । उक्तं च -

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥ [1]
नाभिधा समयाभावात् हेत्वभावान्न लक्षणा ॥ [2]
विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥ [3]

**व्यञ्जना द्विविधा** - शाब्दी आर्थी च । तत्र शाब्दी द्वेधा - अभिधामूला लक्षणामूला च । आर्थी व्यञ्जना च वस्तृबोद्धव्यादीनां वैशिष्ट्याद् अन्यदर्थं बोधयति ।

**ध्वनेर्भेदाः** –

ध्वनेर्मुख्यतया द्वौ भेदौ स्तः - (1) लक्षणामूलो ध्वनिः, अविवक्षितवाच्यध्वनिर्वा । (2) अभिधामूलो ध्वनिः, विवक्षितान्यपरवाच्यध्वनिर्वा । लक्षणामूले ध्वनौ वाच्यार्थस्य विवक्षा प्रयोजनं वा न भवति । व्यङ्ग्यार्थो लक्षार्थम् आश्रित्यावतिष्ठते । अस्यापि द्वौ भेदौ - अर्थान्तरसंक्रमितवाच्य ध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिश्च । अर्थान्तरसंक्रमिते वाच्यार्थः स्वार्थं बोधयन्नपि अर्थान्तरं संक्रामति । अत्यन्ततिरस्कृते वाच्याध्वनौ च वाच्यार्थः सर्वथा तिरस्क्रियते । लक्षणामूलश्चैव ध्वनिः ।

अभिधामूले विवक्षितान्यपरवाच्ये ध्वनौ वा व्यङ्ग्यार्थो वाच्यार्थम् आश्रयते । अस्यापि द्वौ भेदौ - संलक्ष्यक्रम - व्यङ्ग्यध्वनिः, असंलक्ष्यक्रम - व्यङ्ग्यध्वनिश्च । संलक्ष्यक्रमे व्यङ्ग्यध्वनौ व्यङ्ग्यार्थप्रकाशस्य पौर्वापर्यक्रमो लक्ष्यते । असंलक्ष्यक्रमे व्यङ्ग्यध्वनौ च शतपत्रभेदन्यायेन पौर्वापर्यं न लक्ष्यते । तत्र सत्यपि पौर्वापर्ये यौगपद्यात् न तत्र क्रमज्ञानम्। द्वयोरप्येतयोर्भेदयोरनेके भेदा वर्ण्यन्ते ।

---

[1] काव्यप्रकाश.2.14

[2] काव्यप्रकाश.2.15

[3] सा.द.4.1

गुणीभूतव्यङ्ग्ये वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य नाधिकं महत्त्वम् । जगन्नाथमतेन गुणीभूतव्यङ्ग्यं काव्यमपि उत्तमकाव्यान्तर्गतं स्वीकरणीयम् । अस्य अगूढ अपराङ्गव्यङ्ग्यादि भेदेन अष्टौ भेदाः ।

**काव्यं त्रिविधम् -**

ध्वनिवादिमतेन काव्यं त्रेधा विभज्यते – उत्तमं, मध्यमम् , अवरं (अधमं) चेति । व्यङ्ग्यार्थस्य प्राधान्यं यत्र तत् काव्यमुत्तमम् । **वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्।**[1] उत्तमकाव्यस्यापि भेदत्रयम् - रसध्वनिः, अलंकारध्वनिः, वस्तुध्वनिश्च । तत्र रसध्वनिः सर्वोत्तमः ।

**गुणीभूतव्यङ्ग्यं काव्यं मध्यमम् । अताद्दशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।**[2] अत्र व्यङ्ग्यार्थस्य सत्त्वेऽपि वाच्यार्थापेक्षया तस्य गौणत्वं भवति ।

अधमकाव्ये अवरकाव्ये वा शब्दचित्रादिकम् अलंकारप्रदर्शनादिकं च भवति । अत्र रसाभावादस्याधमत्वम् । **शब्दचित्रं वाच्यचित्रव्यङ्ग्यं त्ववरं स्मृतम् ।**[3]

ध्वनिवादस्य महत्त्वस्य कारणमस्ति - यदत्र सर्वेषामपि काव्यमूलतत्त्वानां रसालंकार-वक्रोक्त्यादीनां समावेशो भवति । अत्र रीतिवादवद् न केवलं पाण्डित्यप्रदर्शनम् , अपि तु चित्ताह्लादकत्वं चेतोविकासकत्वं च भवति । ध्वनिवादस्य रमणीयत्वं शब्दमूलकम् अर्थमूलकं शब्दार्थोभयमूलकं च । ध्वनिः काव्ये ललनालावण्ययवद् अपूर्वं रम्यत्वं प्रतीयमानार्थं च द्योतयति ।

खण्डन - मण्डनादिभिः पुष्टः सर्वमान्योऽयं काव्यसिद्धान्तः । नैताद्दशः काव्यसिद्धान्तो भुवनेऽन्यत्रावलोक्यते । अत एवैतस्येयत् महत्त्वम् । ध्वनेरेतस्य असंख्यभेदप्रभेदत्वाद् काव्यस्य सूक्ष्मातिसूक्ष्माः सर्वा विशेषता आत्मसात्करोति ।

एवं च सिध्यति यद् - **ध्वनिरात्मा काव्यस्य** इति शम् ॥

*****

[1] सा.द.4.1

[2] काव्यप्रकाश.1.5

[3] काव्यप्रकाश.1.5

# अल्कूरु मल्लिकार्जुनकृत पृथग्विध बहुवृत्त गर्भ पृथ्वीवृत्तम्

**डा. जोषि सन्तोषकुमारः**

संस्कृत अकाडमी ,

उस्मानियाविश्वविद्यालयः, हैदराबाद् .

संस्कृतसाहित्ये तावत् विभिन्नविषयप्रतिपादकानि बहूनि अलङ्कारशास्त्राणि रचितानि सन्ति। रस-गुणरीतिध्वनौचित्यालङ्कारादिसिद्धान्तानाधारीकृत्य बहवः ग्रन्थाः बहुभिः आलङ्कारिकैः आविष्कृताः सन्ति। एतान् सिद्धान्तानाधारीकृत्य आधुनिकालङ्कारिकाः अपि आधुनिकशैल्या ग्रन्थान् अरचयन् , अधुनापि रचयन्ति च । तस्यां परम्परायाम् अन्यतमः ग्रन्थः **वासुदेवानन्दनामकः** कश्चन आलङ्कारिकः ग्रन्थः। अयं च ग्रन्थः **अल्कूरु गोल्लापिन्नि मल्लिकार्जुनशास्त्रिमहोदयैः** प्रणीतः।

ग्रन्थेऽस्मिन् ग्रन्थकर्त्रा आविष्कृताः प्रक्रियाः तेषां नवनवोन्मेशशालिन्याः प्रतिभायाः दृष्टान्तभूताः भवन्ति।

**ग्रन्थकर्तृपरिचयः**

श्रीमान्तः अल्कूरु गोल्लापिन्नि मल्लिकार्जुनशास्त्रिमहाशयाः(1871-1917) रायचूरु मण्डलान्तर्गत अलकूरुग्रामवासिनः। एतेषां वंशनाम गोल्लापिन्नि । श्रीवत्ससगोत्रोद्भवानां आपस्तम्बसूत्रीयाणां सुब्बमाम्बा-वेङ्करामशास्त्रिदम्पतीनां तनूजोऽयं महाशयः। श्रीगोल्लापिन्निवंशे जनिं लब्ध्वाऽयं तस्य कविपण्डितवंशस्य ख्यातिं वर्धयामास। अस्य महाशयस्य धर्मपत्नी दोणेकल्लु आलूरि वेङ्करामशास्त्रिणः पुत्री सुब्बमाम्बा ।

**विद्याभ्यासः**

शास्त्रिमहाशयः महागुरोः स्वपितुः सकाशे नाटकान्तं साहित्यं, तत्वबोधिनीव्याख्यासमेतं कौमुदीं, न्यायवेदान्तशास्त्राण्यप्यध्यगीष्ट।

अयं महोदयः बाल्ये एव काले पित्रा सह गद्वाल, वनपर्ति, आत्मकूरु संस्थानानि सन्दर्श्य तत्रत्य कविपण्डितान् सन्तुष्टान् कृत्वा तैः “भारती बाललीलरूपः” इत्याख्यं बिरुदमवाप्तवान्। पितृमरणानन्तरं गडेहोतूरु वेङ्कटरामशास्त्रिणां सकाशे ज्योतिश्शास्त्राध्ययनमकरोत्। एवं कालहस्ति - निवासिनां राघवाचार्याणां सकाशे शुश्रूषया व्याकरणशास्त्रं महाभाष्यान्तं अध्ययनं चकार। अध्ययनकाले

एव "खचरमणिपेटिका" इत्याख्यं ज्यौतिषग्रन्थं विरच्य गुरुपादानां सकाशे समर्पितवान्। ततः स्वग्राममागत्य पितामहानां सुब्बाशास्त्रिणां सकाशे समग्रतया वेदान्तशास्त्रमभ्यस्य पञ्चविंशतिवयसि विद्याध्ययनं समापितवान् ।

उपर्युक्तविषयाणाम् आधारभूताः भवन्ति इमे श्लोकाः –

कुलदेवीं पल्लेलाम्बां स्वेष्टदेवौ वृषाकपी ।
वन्दे वेङ्कटारामाख्यं पितरं पण्डितोत्तमम् ॥

श्रीवाणीं कुलदेवतां धृतवतीं श्री पल्लेलाम्बाकृतिं
वन्दे श्रीहरि शंकरौ च जगतामीशौ वशौ भक्तितः।
तातं वेङ्कटरामपण्डितवरं तद्भ्रातरं पण्डितं
शेषाख्यं च जगद्गुरून् मम गुरून् स्तुत्वोपदेष्टॄनपि ॥

शेषाख्यं विबुधं पितृव्यमपि मद्विद्यागुरुं राघवा-
चार्यं नौमि षडङ्गवेदनिचयाभिज्ञं यशोवारिधिम् ।
अन्यं वेङ्कटरामनामाकबुधं वन्दे गुरुं ज्ञानदा-
नाचार्यानपि मल्लिकार्जुननरो भक्तो मुरारेरहम् ॥

श्रीमान् षड्विधदर्शनादिचतुरो वेदान् षड्ङ्गानि चा-
धीत्या सेतु हिमाद्रिभास्वरयशा श्रीकालहस्त्यां स्थितो
गृह्णाद्वद्य नतीः स राघवसुधीर्विद्यागुरुर्होतरू ।
वासी वेङ्कटराम नामकसुधीश्चान्योऽपि विद्यागुरुः॥ (वासुदेवानन्दपीठिकाभागः)

**सभासन्दर्शनानि**

एते महानुभावाः बल्लारि , कडप इत्यादिप्रदेशेषु शतावधानानां प्रदर्शनमकुर्वन्। गद्वाल , वनपर्ति, आत्मकूरु संस्थानानि सन्दर्श्य नैकान् सम्मानान् बिरुदान् च प्राप्तवन्तः। कवितासार्वभौम, सकलशास्त्राभिज्ञ इत्यादि पुरस्कारान् प्राप्तवन्तः।

ततः वासुदेवानन्द नामकं अलङ्कारशास्त्रम् अरचयन्। एवमेव "ज्योतिश्शास्त्रसुधर्मसार" इत्याख्यं ग्रन्थं विरच्य कालडि अग्रहारे श्रृङ्गगिरि नृसिंहभारती स्वामिनां चरणयोः समर्पितवन्तः। स्वामिनः महाशयान् अमून् "पण्डितसार्वभौम" इति बिरुदेन सभाजितवन्तः॥

**अन्ये ग्रन्थाः**

वासुदेवानन्दः - अलङ्कारशास्त्रग्रन्थः, पातञ्जलभाष्यार्थम् , ज्योतिश्शास्त्रसुधर्मसार-निबन्धः, धर्मशास्त्ररत्नाकरः, खचरमणिपेटिका इत्यादि ग्रन्थाः महाशयेन विरचिताः ग्रन्थाः।

**वासुदेवान्दः – अलङ्कारशास्त्रम्**

वासुदेवान्दः अलङ्कारशास्त्रं तावत् गोल्लापिन्नि साहितीकुटुम्बं ताडिपत्रि द्वारा 1995 तमे प्रकाशितम्। ग्रन्थेऽस्मिन् पञ्चभागेषु षोडश प्रकरणान्यासन्। परं अयं च ग्रन्थः पूर्णतया नोपलब्धः।

**ग्रन्थस्थविषयाः**

ग्रन्थेऽस्मिन् विंशतियमकभेदान् उक्त्वा तेषां चतुश्चत्वारिंशत् दृष्टान्ताः दर्शिताः। एवमेव कविरयं विभिन्नबन्धान् ग्रन्थेऽस्मिन् चित्रितवान् । रथः, चक्रं, गुच्छः, गोपुरं, नागः, अष्टदलपद्मबन्धः, षोडशदलपद्मबन्धः, गोमूत्रिकाबन्धः, पुष्पमालिकाबन्धः, कुलालचक्रबन्धः, आन्दोलिकाबन्धः चामरबन्धः कंकणबन्धः इत्यादिबन्धाः सचित्रम् अत्र प्रदर्शिताः। एतेषु बहवः बन्धाः प्राचीनालङ्कारग्रन्थेषु नोक्ताः। एवमेव अष्टोत्तरसहस्रदलपद्मबन्धरचना महाशयानाम् एतेषां बुद्धेः तीक्ष्णतायाः अद्भुतसृजनात्मकतया प्रमाणभूतमिति वक्तुं शक्यते । अत्र पठनविधानमपि सम्यगुक्तं कविनाऽनेन।

**पृथग्विधबहु वृत्तगर्भपृथ्वीवृत्तम्**

शास्त्रिमहाशयानाम् अपूर्वकवित्वसृजनायाः अन्यतममुदाहरणमिति वक्तुं शक्यते ।

पृथ्वीवृत्ते एक श्लोकः रच्यते। पृथ्वीवृत्ते रचित श्लोकगतवर्णैः आरभ्य, अथवा कांश्चन वर्णान् परित्यज्य पठनेन विभिन्नवृत्तेषु श्लोकाः आविष्कृताः भवन्ति। **हरे सुगुण संयुत** इत्यादि पृथ्वीवृत्तश्लोकेन 1.मञ्जुभाषिणी 2. जलोद्धतगतिः, 3. रथोद्धता 4. प्रियंवदा 5. अनुष्टुप् 6. वियोगिनी 7. प्रमिताक्षरा, 8.प्रमाणिका, 9.केतुमती, 10 वंशस्थम् 11. उपेन्द्रवज्रा 12. गीतिः, 13.उपगीतिः, 14.आर्यागीतिः, 15.वैतालीय, 16. दक्षिणान्तिक वृत्तानि षोडशविधानि जायन्ते ।

प्राचीनालङ्कारशास्त्रेतिहासं यदि वयं परिशीलयामः रुद्रटकाव्यालङ्कारे एकस्मिन् वृत्ते अन्यद् वृत्तं एकमेव गर्भितं दृश्यते। तस्योदाहरणमपि दत्तं रुद्रटेन ।

एकस्मिन् पृथ्वीवृत्ते षोडशवृत्तानि गर्भितानि सन्त्यत्र। एतादृश रचनाप्रक्रिया शास्त्रिमहाशयानां बन्धरचनासामर्थ्यस्य निदर्शनमिति वक्तुं शक्यते । तदेवं वर्तते –

**पृथ्वीवृत्तम्** – **जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः। ( ज स ज स य ल गु , अत्यष्टीछन्दः** -17 )

हरे सुगुण संयुत स्थिरगुरो प्रभो देहिनः सुखानियति सत्पते स्फुटरुचिं सनादोदय ।

कलेश विविधार्थकृज्जय दिशङ्का राजितः प्रभा विलसितादिम प्रमहितस्थ भूमापते ॥

अस्मिन् पद्ये पादे पादे **प्रथम द्वितीय तृतीय चतुर्दशवर्णानां** परित्यागेन मञ्जुभाषिणीवृत्तं भवति। तद्यथा –

**हरे सु** गुण संयुत स्थिरगुरो प्र**भो**देहिनः **सुखानि** यति सत्पते स्फुटरुचिं स**ना**दोदय ।

**कलेश** विविधार्थकृज्जय दिशङ्**का** राजितः **प्रभा वि** लसितादिम प्रमहितस्थ **भू** मापते ॥

**1.मञ्जुभाषिणीवृत्तम्** – **सजसा जगौ भवति मञ्जुभाषिणी । (स ज स ज गु , अतिजगतीछन्दः** -13)

गुणसंयुत स्थिरगुरो प्रदेहिनो

यति सत्पते स्फुटरुचिं सदोदय ।

विवधार्थकृज्जयदिशङ्ग राजितः

लसितादिम प्रमहितस्थमापते॥

तस्मिन्नेव पृथ्वीवृत्ते पादे पादे त्रयोदशादि सप्तदशान्तवर्णानां परित्यागेन जलोद्धतगतिवृत्तम् भवति।

तद्यथा –

**2.जलोद्धतगतिवृत्तम्** – **रसैर्जसजसा जलोद्धतगतिः। (जसजस, जगतीछन्दः** -12)

हरे सुगुण संयुत स्थिरगुरो

सुखानियति सत्पते स्फुटरुचिम् ।

कलेश विविधार्थकृज्जयदिश

प्रभाविलसितादिम प्रमहित ॥

तस्मिन्नेव पृथ्वीवृत्ते पादे पादे प्रथमादि पञ्चमान्तवर्णानां चतुर्दशवर्णस्य च परित्यागेन रथोद्धतावृत्तं भवति । तद्यथा–

**3.रथोद्धतावृत्तम्** – **रान्नराविह रथोद्धता लगौ ( र न र लघु गुरु ) (त्रिष्टुप् छन्दः** -11)

संयुत स्थिरगुरो प्रदेहिनः

सत्पते स्फुटरुचिं सदोदय ।

अर्थकृज्जय दिशञ्च राजित

तादिमप्रमहितस्थ मापते ॥

अस्मिन्नेव पृथ्वीवृत्ते पादे पादे **प्रथम-द्वितीय-सप्तम-अष्टम-चतुर्दशाक्षराणां** परित्यागेन प्रियंवदावृत्तं भवति। तद्यथा–

**4.प्रियंवदा – भुवि भवेन्नभजरैः प्रियंवदा । (जगतीछन्दः -12 )**

सगुण संस्थिर गुरो प्रदेहिनः

नियति सत् स्फुटरुचिं सदोदय ।

सविविधाऽऽजय दिशञ्च राजित

विलसिता प्रमहितस्थ मापते ॥

अथ **प्रथम-तृतीयपादयोः पंचमाद्यष्टमान्तवर्णानां त्रयोदशादिसप्तदशान्त वर्णानां** च परित्यागेन **द्वितीय, चतुर्थपादयोः नवमादि सप्तदशांत वर्णानां** च परित्यागेन अनुष्टुप् वृत्तम् भवति ।

**5.अनुष्टुप् -8**

हरे सुगु स्थिरगुरो सुखानियति सत्पते ।

कलेश विज्जय दिशा प्रभाविलसि तादिम ॥

प्रथम - तृतीयपादयोः चतुर्थादिवर्णत्रय नवमादिवर्णद्वय पंचदशादिवर्णत्रयाणां ग्रहणेन द्वितीय चतुर्थपादयोः तृतीयाष्टम द्वादश चतुर्दश वर्णानां त्यागेन वियोगिनीवृत्तं भवति।

**6.वियोगिनीवृत्तं**

विषमे ससजा समे गुरु सभरालोऽथ गुरुर्वियोगिनी ॥ 1-3 पादयोः स स ज गु (10) 2-4 पादयोः सभरा ल गु (12 द्वादशाक्षराणि ) अर्धसमवृत्तम् ।

गुणसंस्थिर देहिनः सुथा यति सत्पस्फुटरुक् सदोदय ।

विविधाऽऽजयराजितप्रभाः लसितादि प्रमहिस्थ मापते ॥

पादे पादे प्रथम -द्वितीय - तृतीय , चतुर्दश, पंचदश, वर्णानां परित्यागेन प्रमिताक्षरावृत्तम् ।

**7.प्रमिताक्षरा –**

**प्रमिताक्षरा सजससैरुदिता ॥ स ज स स (जगतीछन्दः -12 )**

**गुणसंयुत स्थिरगुरो प्रहिनो यतिसत्पते स्फुटरुचिं सदय ।**

**विविधार्थकृज्जयदिशङ्ग जित लसितादिम प्रमहितस्थपते ॥**

पादे पादे तृतीयादि दशमांतवर्णानां ,चतुर्दश वर्णस्य च परित्यागे प्रमाणिकावृत्तं यथा –

**8. प्रमाणिका – प्रमाणिका जरौ लगौ । (ज र ल गु अनुष्टुप् -8)**

हरे गुरो प्रदेहिनः सुखा रुचिं सदोदय।

कले दिशङ्ग राजित प्रभाहितस्थ मापते ॥

**प्रथम तृतीय पादयोः प्रथमादि वर्णत्रयस्य चतुर्दशादि सप्तदशांत वर्णानाञ्च परित्यागेन, द्वितीय चतुर्थ पादयोः द्वितीय वरवर्णञ्च तथैव परित्यागेन केतुमतीवृत्तं यथा ।**

**9.केतुमती**

**असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद् गः। अर्धसमवृत्तम् 1-3 पादयोः स ज स गु , 2-4 भ र न गुरुद्वयम् भवति ।**

गुणसंयुतस्थिरगुरो प्रभा यति सत्पते स्फुटरुचिं सख ।

विविधार्थ कृञ्जय दिशङ्गभा लसितादिमप्रमहितस्थ॥ 9

पादे पादे चतुर्थ - पञ्चमाष्टम द्वादश चतुर्दशवर्णनां परित्यागेन वंशस्थवृत्तं यथा –

**10.वंशस्थम्**

**जतौतु वंशस्थमुदीरितं जरौ ॥ ज त ज र , जगतीछन्दः- 12**

हरे सुसंयक् स्थिरगु प्रभो हि नः सुखानि सत्सस्फुटरुक् सनादयः।

कलेश धार्थोजय दिग्ङ्गराजित प्रभाविताादि प्रमहिस्थ भूपते ॥

पादे पादे चतुर्थ पंचमाष्टम द्वादशी चतुर्दश सप्तदश वर्णानां परित्यागेन उपेन्द्रवज्र वृत्तं यथा –

**11.उपेन्द्रवज्रा**

**उपेन्द्रवज्रा यदि तौ जगौ गः। त त ज गुरुद्वयं , त्रिष्टुप् छन्दः।**

हरेसु संयुक् स्थिरगु प्रभो हि सुखानि सत्सस्फुटरुक्सनाद ।

कलेशधार्थो जयदिग्ङ्गराज प्रभाविताामि प्रमहिस्थ भूप ॥

प्रथम-तृतीयपाद्योः प्रथम द्वितीय तृतीयवर्णानां त्रयोदशादि सप्तदश वर्णानाञ्च परित्यागेन द्वितीय चतुर्थपाद्योः चतुर्दशादि सप्तदशान्त वर्णानाञ्च परित्यागेन गीतिः यथा –

**12.गीतिः**

गुणसंयुत स्थिरगुरो सुखाः नियत सत्पते स्फुटरुचिं सः।

विविधार्थकृज्जय दिशप्रभा विलसितादिमप्रहमितस्थः॥

प्रथम-तृतीयपाद्योः पूर्वोक्त तत्परित्यागेन द्वितीय चतुर्थपाद्योः द्वादशादि सप्तदशान्त वर्णानां परित्यागेन उपगीतिः। यथा –

**13.उपगीतिः**

गुणसंयुत स्थिरगुरो सुखानियति सत्पते स्फुटरुक् ।

विविधार्थ कृज्जय दिशप्रभा विलसिताम प्रमहि ॥

प्रथम तृतीय पाद्योः पूर्वोक्तवत्परित्यागेन द्वितीय चतुर्थपाद्योः चतुर्दश पञ्चदशाक्षर परित्यागेन आर्यागीतिः । यथा –

**14. आर्यागीतिः**

**आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।** पूर्वार्धं त्रिंशन्मात्रायुक्तम् अन्तेगुरुः, उत्तरार्धं त्रिंशन्मात्रयुक्तं भवति ।

गुणसंयुत स्थिरगुरो सुखानियति सत्पते स्फुटरुचिं सदय ।

विविधार्थ कृज्जयदिश प्रभा विलसितादिम प्रमहितस्थपते ॥

प्रथम तृतीय पाद्योः प्रथमादित्रय - अष्टमादि त्रय - चतुर्दश वर्णानां त्यागेन द्वितीयचतुर्थपाद्योः प्रथमादित्रियाष्टम् द्वादश चतुर्दश वर्णानां परित्यागेन **वैतालीयम् ।** यथा –

**15.वैतालीयम्**

गुणसंयुगुरः प्रदेहि नो यति सत्पटस्फुट रुक्सदोदय ।

विविधार्थ दिशञ्ज राजित लसितादिम प्रमहिस्थ मापते ॥

प्रथमतृतीय पाद्योः सप्तमादि षड्वर्णानां चतुर्दश वर्णस्य परित्यागेन द्वितीय चतुर्थपाद्यो चतुर्थ पञ्चमाष्टमादि त्रय चतुर्दश वर्णानां परित्यागेन दक्षिणान्तिका। यथा –

**16. दक्षिणान्तिका**

हरे सुगुण संप्रदेहिनः सुखानि सस्परुचिं सदोदय ।

कलेश विविधाङ्ग राजित प्रभाविताादि हितस्थ मापते ॥

**उपसंहारः**

**अल्कूरि मल्लिकार्जुनशास्त्रि**महोदयेन विरचित **वासुदेवानन्दनामके** अलङ्कारशास्त्रे अष्टोत्तर सहस्रदलपद्मबन्धः, **पृथग्विध बहुवृत्त गर्भ पृथ्वीवृत्तम्** इत्यादिविशेषाः बहवः दृश्यन्ते । प्राचीनालङ्कारशास्त्रेषु अदृष्टाः अपूर्वाः विषयाः बहवः शास्त्रिमहोदयैः आविष्कृताः। एतेषां पाण्डित्यं कवित्वपाटवं वाचा वक्तुं न शक्यते एव । एतादृशरचनाविशेषाः भारतीयानां सुनिशितबुद्धिवैभवं दर्शयन्तीति शम् ॥

*****

**परामृष्टग्रन्थसूची** –

1. वासुदेवानन्दः- 1995
2. वृत्तरत्नाकरः- केदारभट्टः
3. विज्ञानसर्वस्वम् - तेलुगुभाषासमिति

# ऊरुभङ्गे सामाजिक पारिवारिकपरिस्थितिः-

**Ganga, O M**
Research Scholar,
The Madras Sanskrit College ,
Mylapore, Chennai.

भारतीयरूपककारेषु अग्रेसरस्य महाकविभासस्य अद्वितीयं रचनाकौशलमेव ऊरुभङ्गाख्य - रूपकम्। महाभारतेतिवृत्तमाश्रित्य प्रणीतेऽस्मिन् रूपके दुर्योधनः केन्द्रपात्रत्वेन विराजते। किन्तु महाभारताश्रितेषु इतरग्रन्थेषु दुर्योधनस्य एतावता प्राधान्यं न दृश्यते। किन्तु किरातार्जुनीये दुर्योधनस्य राजतन्त्रपटुत्वं वर्णितं भवति। तथापि अस्मिन् ऊरुभङ्गाख्यरूपके महाभारतस्य कथासन्दर्भः दुर्योधनपक्षे विशिष्टरूपेण वर्णितः भवति।

ध्वन्यालोककारेण आचार्यानन्दवर्धनेन महाभारतस्य विषये एवं सूच्यते – "वृष्णिपाण्डवविरसावसानवैमनस्यदायिनीं समाप्तिम् उपनिबध्नता महामुनिना वैराग्यजननतात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः शान्तो रसश्च मुख्यतया विवक्षाविषयत्वेन सूचितः ।" इति। तद्वत् अत्र महाकविः भासः अपि स्वकाव्यरचनया युद्धस्य वैमनस्यदायित्वं दर्शयित्वा एवं युद्धविषयक वैराग्यं सहृदयेषु समानयति। नाटकस्य अस्य नायकः दुर्योधनोऽपि युद्धावसानसमये युद्धस्य दैन्यताम् अवगतवानिति नाटकात् अवगन्तुं शक्यते।

युद्धावसानसमये दुर्योधनसविधे समागतानां बन्धुमित्रादीनाम् एवं गुरूणां च दुर्योधनेन सह संजातभाषणात् सामाजिकबन्धस्य एवं कुटुम्बबन्धस्य च तीक्ष्णता ज्ञायते।

## 1.गुरुशिष्यसंबन्धनिरूपणावसरः

युद्धावसानसन्दर्भे पाण्डवानां वञ्चनया प्रियशिष्यदुर्योधनः प्रतारितः इति विषयं ज्ञात्वा सरोषं समरभूमिं प्रविशति गुरुः बलदेवः एवम् –

"भो भो पार्थिवाः! न युक्तमिदम्।

मम रिपुकुलकालं लाङ्गलं लङ्घयित्वा
रणकृतमतिसन्धिं मां च नावेक्ष्य दर्पात्
रणशिरसि गदां तां तेन दुर्योधनोर्वोः

कुलविनयसमृद्ध्या पातितः पातयित्वा" ॥ इति। (श्लोकसंख्या 27)

अपि च युद्धवैमनस्यज्ञो दुर्योधनः कोपाविष्टं गुरुं सान्त्वयति एवम् - अद्य प्रथमं भूमौ पतितं मच्छिरः तव चरणयोः प्रणमति। रोषः परित्यज्यतां , कुरुकुलजातानां तर्पणार्थं पाण्डवाः जीवन्तु। इदानीं वैरं युद्धकथा वयं च सर्वे समाप्ताः। तद्यथा-

त्वत्पादयोर्निपतितं पतितस्य भूमा-
वेतच्छिरः प्रथममद्य विमुञ्च रोषम्।
जीवन्तु ते कुरुकुलस्य निवापमेघा
वैरं च विग्रहकथाश्च वयं च नष्टाः॥ इति।(श्लोकसंख्या 31)

अनेन एकेन सम्भाषणांशेनैव दुर्योधनबलदेवयोः गुरुशिष्यस्नेहावगमः भवति।

**2. मातृपुत्रस्नेहनिरूपणावसरः**

युद्धभूमौ दुर्योधनमन्विष्य समागता माता एवं वदति - जात, सुयोधन, देहि मे प्रतिवचनम्। पुत्रशतविनाशदुःखितं समाश्वासय महाराजम् इति। एवं च सा पुत्रं वात्सल्यातिरेकात् जात, पुत्रक, सुयोधन इत्यादि पदैः सम्बोधयति। एवं च धृतराष्ट्रं महाराजमिति आहूय, स्वपुत्रं विचिन्त्य गान्धारी एवं वदति- "अहमभीतपुत्रप्रसविनी" इति। अनेन तस्याः पुत्राभिमानित्वं दृश्यते।

पुत्रः सुयोधनः यदा मातरं नमस्कृत्य एवं वदति अन्यस्यां जात्यामपि त्वमेव मम जननी भव इति। यथा -

नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम्।
अन्यस्यां अपि जात्यां मे त्वमेव जननी भव॥(श्लोकसंख्या 50)

निवेदितवान् तदा मातुः प्रतिवचनं यथा - मम मनोरथः खलु त्वया भणितः "। अत्रापि तस्याः पुत्रस्नेहः सुस्पष्टः भवति।

**3.पितृपुत्रस्नेहनिरूपणावसरः।**

"गान्धारी किं दृश्यते दुर्योधननामधेयः कुलमानी?" इति पृच्छन् युद्धमूमिं प्रविशति धृतराष्ट्रः। एवं स्वपुत्रं दुर्योधनं कुलमानीति सगौरवं पृच्छति धृतराष्ट्रः । अनेन पुत्रस्थस्नेहाभिमानावगमनं संजायते।

शतपुत्रकः अपि धृतराष्ट्रः पुत्रदत्तं निवापं भोक्तुं भाग्यहीन इति तस्य दुःखविलापः भवति। तच्च एवं भवति –

रिपुसमरविमर्दं मानवीर्यप्रदीप्तम्
सुतशतमतिधीरं वीरमुत्पाद्य मानी।

धरणितलविकीर्णं किं स योग्यो न भोक्तुं
सकृदपि धृतराष्ट्रः पुत्रदत्तं निवापम्॥ (श्लोकसंख्या 39)

अपि च दुर्योधनस्य युद्धानन्तरस्थितिम् अवगत्य स्वतः अन्धः अपि धृतराष्ट्रः पुत्रस्नेहेन अन्धतरः जातः इति स्वयं वदति। एवम्-

वञ्चनानिहतं श्रुत्वा सुतमद्याहवे मम ।
मुखमन्तर्गतास्राक्षमन्धमन्धतरं कृतम्॥ श्लोकसंख्या(37)

एवं च दुर्योधनदुर्जययोः परस्परस्नेहसंम्भाषणं सहृदयानां मनसि प्रकम्पनं करोति। धृतराष्ट्रगान्धार्योः मार्गदर्शकरूपेण समागतशिशुः रणभूमौ स्वबालचेष्टया दुर्योधनस्य मनसि पुनरपि जीवनाभिलाषं प्रयच्छत्यपि स्वनिस्सङ्गतां प्रदर्शयन् रूपकस्य हृदयावर्जकरङ्गं चित्रीकरोति। पुत्रागमनं दृष्ट्वा दुर्योधनस्य मुखात् निर्गता वाणी अपि अस्य पुत्रवात्सल्यमेव द्योतयति। यथा - "अयमप्यागतः। भोः सर्वावस्थायां हृदयसंनिहितः पुत्रस्नेहो मां दहति"। वाक्यमिदं दुर्योधनस्य पुत्रवात्सल्यात् जनित हृदयव्यथां दर्शयति।

शिशोः दुर्जयस्य युद्धभूमौ आगमनावसरे पितुः कष्टतां नावगच्छति। अतः एव बालः एवं वदति - 'महाराजो भूम्यामुपविष्टः' इति। पुत्रसम्मुखे स्वक्लेशं प्रकटितुमनिच्छुः दुर्योधनः अतः एव पृच्छति - पुत्र! किमर्थमिहागतः इति। तस्मिन्नवसरेऽपि चिरायसीति पुत्रमुखात् श्रुत्वा व्रणितः दुर्योधनः पुनरपि वदति - अस्यामप्यवस्थायां पुत्रस्नेहो हृदयं दहतीति। तस्मादपि दुर्जयः दुर्योधनस्य अङ्के यदा उपवेष्टुमागच्छति तदितोऽपि वेदनामुत्पादयति।

हृदयप्रीतिजननो यो मे नेत्रोत्सवः स्वयम्।
सोऽयं कालविपर्यासाच्चन्द्रो वह्नित्वमागतः॥ इत्येव।

तथाऽपि किमर्थं तम् अङ्के उपवेष्टुम् नाङ्गीकरोति इत्यज्ञातस्य शिशोः स्थितिः अपि दुःखं जनयति।

त्यक्त्वा परिचितं पुत्र यत्र तत्र त्वयास्यताम्।
अद्य प्रभृति नास्तीदं पूर्वभुक्तं तवासनम्॥ (श्लोकसंख्या 44)

इत्येवं प्रकारेण दुर्योधनोक्तिं श्रुत्वा कुत्र गमिष्यति पिता इति सन्देहं प्रकटयति पुत्रः। जननमरणतथ्यानि अवगन्तुं न प्रभवति पुत्रः इत्यतः यथा बालस्यावगतिः भवति तद्वदेव दुर्योधनस्य प्रतिवचनम्। "भ्रातृशतमनुगच्छामि" इति। तच्छ्रुत्वाऽपि कार्यमनवगतः शिशुः "मामपि तत्र नय" इत्येव वदति। द्वयोः एतादृशभाषणं सर्वेषां मनसि दुःखमापादयति। अत्र पात्राणां मध्ये दुर्जय-दुर्योधनयोः परस्परस्नेहः एव सहृदयानां मनसि प्रकम्पनमानयति।

**4. पतिपत्नीसंबन्धनिरूपणावसरः।**

गान्धारीदेव्याः आज्ञां पालयित्वा प्रविशतः दुर्योधनस्य पत्न्यौ। दुर्जयदुर्योधनयोः मध्ये विद्यमान-भाषणवत् दीर्घभाषणम् अत्र न दृश्यते। तथापि दुर्योधनस्य एकम् वाक्यं सर्वेषां मनसि कष्टतामुत्पादयति। ममापि स्त्रियः रुदन्तीति। शत्रुनारीणां रोदनं राज्ञां वीर्यम् प्रदर्शयति। किन्तु अत्र स्वजनानाम् एवं स्वपत्नीनाम् रोदनम् तथा हृदयं दहतीति अवलोकयितुं शक्यते। एवं पौरवीं मालवीं च प्रत्येकं आहूय 'युधि पराङ्मुखः न हतः भर्ता' इत्यादि रूपेण पत्नीनां निकटे भाषणसमये पौरवी तु वदति - एककृतप्रवेशनिश्चया न रोदिमि। किन्तु मालवी तु रोदिति। बाला एषा सहधर्मचारिणी रोदिमि इत्येव तस्याः वचनम्। परस्परप्रेम्णा धैर्यप्रदानेन तेषां परस्परबन्धः वीरोचितरीत्या चित्रीकृतः।

**5. मैत्रीनिरूपणावसरः।**

रूपकस्य अस्य अन्तिमरङ्गे एव मैत्रीनिरूपणमवलोकयितुं शक्यते। कुरुकुलतिलकभूतः कुरुराजः, गान्धारीपुत्रः इत्यादिपदेन एव अश्वत्थामा स्वमित्रम् अभिबोधयति। स्वमित्रस्य कष्टस्थितौ तस्मै किमपि वा साहाय्यं कर्तुं सिद्धः स्वयमिति प्रकाशयति अश्वत्थामा एवं -

युद्धोद्यतं गरुडपृष्ठनिविष्टदेहमष्टार्धभीमभुजमुद्यतशार्ङ्गचकम्।

कृष्णं सपाण्डुतनयं युधि शस्त्रजालैः संकीर्णलेख्यमिव चित्रपटं क्षिपामि ॥(श्लोकसंख्या 60) इति। तथापि तस्मात् निवारयति दुर्योधनः स्वमित्रम्। "भवान् धनुर्मुञ्चतु" इत्येव गुरुपुत्रं स्वमित्रं प्रति वदति राजा दुर्योधनः।

गतं धात्र्युत्सङ्गे सकलमभिषिक्तं नृपकुलं
गतः कर्णः स्वर्गं निपतिततनुः शन्तनुसुतः।
गतं भ्रातॄणां मे शतमभिमुखं संयुगमुखे
वयं चैवंभूता गुरुसुत! धनुर्मुञ्चतु भवान्॥ इति।

एवं दुर्योधनस्य वाक्यं श्रुत्वा दुःखितः अश्वत्थामा एवं विलपति – कुरुराज ! पाण्डुपुत्रेण ऊरुद्वयेन समम् अद्य भवतः दर्पः अपि अपहृतः इति। तथापि दुर्योधनः तच्च नाङ्गीकरोति। एवं प्रतिवचः ददाति च। मानशरीराः एव राजानः। मानार्थमेव मे निग्रहो गृहीतः। एवं च पाण्डवान् प्रति स्वयं यद्यदाचरितं तस्मिन् अपराधबोधजनितदुःखेन पुनरपि तादृशवृत्तिः न भवेत् इति आशापि दुर्योधनमनसि विद्यते। अतः एव अयं दुर्योधनः एवमपि वदति-

यत्कृष्टा करनिग्रहाञ्चितकचा द्यूते तदा द्रौपदी
यद्बालोऽपि हतस्तदा रणमुखे पुत्रोऽभिमन्युः पुनः।

अक्षव्याजजिता वनं वनमृगैर्यत्पाण्डवाः संश्रिता
नन्वल्पं मयि तैः कृतं विमृश भो! दर्पाहृतं दीक्षितैः॥इति (श्लोकसंख्या 63)

तथापि स्वमित्रं प्रति विद्यमानस्नेहान्धेन तत् सर्वं श्रोतुम् अश्वत्थामा न प्रयतते। अतः एवं वदति – अयं रणे धक्ष्यामि पाण्डवान् इति।

सामाजिकबन्धः युद्धानन्तरकथावर्णनया हृदयावर्जकरूपेण वर्णितः कविना। कथाप्रतिपादनं दुर्योधनपक्षे चेदपि पाण्डवान् प्रति स्वयं कृतानर्थं किमिति जानाति दुर्योधनः। एवं तस्मिन् सः दुःखितः च दृश्यते। अस्य पाण्डवान् प्रति दर्पः एव प्रायः इतरकाव्येषु द्रष्टुं शक्यते। किन्तु अत्र अस्य गुरुभक्तिः, मातृस्नेहः, पितृभक्तिः, पुत्रवात्सल्यम् , मैत्री च अनुपमरीत्या वर्णिताः। अनेन दुष्टपात्रताप्रसिद्धिरस्ति चेदपि तेषां मनसि अपि स्वजनस्नेहः, जीवनाभिलाषः च नितरां वर्तेते इति कविः अस्मान् बोधयति। एवं च युद्धस्य निरर्थकता एवं परस्परस्नेहस्य व्याप्तिः चेति संदेशम् अस्मान्बोधयति महाकविः भासः।

*****

**<u>ग्रन्थसूची</u>**

ऊरुभङ्गः, महाकविः भासः, digitallibraryindia; JaiGyan,1940
ध्वन्यालोकः, आचार्यःआनन्दवर्धनः,चौखम्बा संस्कृत सीरिज् , वाराणसी, 2006

# संस्कृते सुभाषितानाम् औन्नत्यम्

**एस्. सुगन्धा,**
शोधच्छात्रा,
मद्रपुरी महाविद्यालयः
मयिलापूर्, चेन्नै

**आमुखम्**

संस्कृतवाङ्मये अनेके कवयः अनेके ग्रन्थाः च सन्ति। तान् सर्वानपि यद्यपि पठितुं ज्ञातुं च इच्छा अस्ति, तथापि यत् सारभूतं तदेव ग्राह्यम् उचितं भवति। संस्कृतवाङ्मयस्य नीतिबोधकानि सुभाषितानि, श्लेषभरिताः श्लोकाः, सरसाः समस्याः, कूटानि, प्रहेलिकादयः च व्यवहारचातुर्यं बोधयन्ति। एतानि सुभाषितानि पामराणामपि अवगन्तुं शक्यन्ते इति समालोच्य तदनुगुणमेव इदं पत्रं संग्राह्यमिति मदीया आकाङ्क्षा। अतः एव सुष्ठुरूपेण इमे विषयाः इह क्रमशो विचार्यन्ते। यथा -

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥ - सुभाषित मञ्जरी 1.5

**सुभाषितस्य लक्षणम्**

सुभाषितम् नाम सुष्ठु प्रोक्तं वचनम्। संस्कृतवाङ्मये सुभाषितानि बहुशः छन्दोबद्धानि। अस्य पद्यानि अर्थपुष्ट्या वर्तन्ते। यथा-

पुराणेष्वितिहासेषु तथा रामायणादिषु।
वचनं सारभूतं यत् तत् सुभाषितम्॥ - सुभषित रत्न भाण्डागार

विदुषां मुखात् आशुकवितारूपेण निस्सृत्य सर्वान् पण्डितपामरान् आह्लादयन्ति च। समयोचितवाग्विजृम्भणम् , समस्यापूरणम् - इत्यादीनि मार्गस्यास्य भिन्नगतयः।

संस्कृतभाषायां बहवः सुभाषितसङ्ग्रहग्रन्थाः अद्योपलभ्यन्ते। एतेषु प्रस्तुताः विषयाः बहुत्र एवं भवन्ति - सुभाषितप्रशंसा, कविकाव्यप्रशंसा, संसारविवरणम्, सज्जनः - दुर्जनः, सद्गुणः - दुर्गुणः, अज्ञानखण्डनम्, मूर्खनिन्दनम्, परतत्वविवेकः, स्वस्थानपरिज्ञानम्, राजनीतिः, धर्मः, वैराग्यम् , भक्तिः, मानुषप्रयत्नम् ... इत्यादीनि ।

'मुक्तकम्' इति व्यपदेशेन बोधप्रदमेकं पद्यं व्यवह्रियते । वेदवाङ्मयात् आरभ्य मन्वादिस्मृतिषु, अनेककवीनां काव्येषु, पुराणग्रन्थेषु, विविधशास्त्रग्रन्थेष्वपि मुक्तकानि दरीदृश्यन्ते । एतेषां ललितकोमलकान्तपदावलिः हृद्या अनवद्या च ।

कानिचन उदाहरणानि अत्र प्रदत्तानि –

अयं निजः परो वेति गणना लघुचेतसां ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ - **सुभाषित रत्न भण्डाकार**

भारतीयसंस्कृतेः बहुमुख्यांशः कः ? इति प्रश्ने पृष्टे सति - स एव विश्वात्मभावमनोधर्मः इति झटिति स्फुरति । तदेव अंशं अयं प्रचुरश्लोकः

तथाप्येको रामः सकलमवधीद्राक्षसकुलं

क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ - भोजप्रबन्धम्

भोजप्रबन्धात् उद्धृतं पद्यमेतत् मानुषप्रयत्नस्य मौल्यं प्रतिपादयति । स्वत्वपरिज्ञानं, सत्त्वपुरः-सरजीवनस्य विविक्तवैशिष्ट्यं च भृशं निर्दिशति ।

जाड्यं धियो हरति सिञ्चति वाचि सत्यं, मानोन्नतिं दिशति पापमपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्सङ्गतिः कथय किं न करोति पुंसाम्॥

- नीतिशतकम् 13

सत्सङ्गतिः मौढ्यं निराकरोति, वाचि सत्यं सिञ्चति, मानोन्नतिं करोति, पापं हरति, मनसि निर्मलत्वं प्रसादयति, कीर्तिं प्रसारयति च। किम् न साध्यं सत्सङ्गत्या ?

कर्मण्येवाधिकारस्ते । मा फलेषु कदाचन “ गीतावक्यस्यास्य उपबृंहणमेव अयं श्लोकः ।

सन्तः सदाभिगन्तव्या यदि नोपदिशन्त्यपि ।

यास्तु स्वैरकथास्तेषां उपदेशा भवन्ति ताः ॥

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति इति वाक्यं स्फुटीकरोति पद्यमेतत्।

विद्वद्रसिकानां जल्पनमपि उपदेश इव सप्रश्रयं गृह्णीयात् इति अस्य भावः ।

**उपसंहारः**

एतानि पद्यानि स्वीयवर्णनचमत्कृतिद्वारा लोकसङ्ग्रहतत्त्वं बोधयन्ति। मानुषजीवनस्य वैशिष्ट्यं हृदयङ्गमरीत्या निर्दिशन्ति। प्राप्तजन्मनः साफल्यं कथं प्राप्नुयात्? एतन्निमित्तं किम् अनिवार्यमिति मार्मिकरीत्या सूचयन्ति। अत्र उक्तानि कानिचन उदाहरणानि एव। एतानि नानाविधानि सुभाषितानि नद्यः सागरे सङ्गताः इव सन्ति। श्रुतिस्मृतिपुराणकाव्येतिहासेषु उक्तानां सुभाषितानां महत्त्वं जनानां सन्मार्गप्रदर्शनार्थं, जीवनस्य लक्ष्यार्थं, ज्ञानवर्धनार्थं, मोक्षप्रदानार्थं प्रदर्शितानि।

**उपयुक्तग्रन्थसूची**

1.सुभाषितरत्न भाण्डागार (A collection of over 10,000 subhasitas,) काशीनाथ शर्मा, (1952), निर्णय सागर् प्रेस

sa.wikipedia.org/wiki/subhashitani

# संस्कृत "भारत की पारंपरिक भाषा" घोषित हो

**Dr. Sathyanarayana HK**
Asst Prof in Hindi
The Madras Sanskrit College
84, R.H. Road, Mylapore, Chennai

वस्तुतः संस्कृत भाषा भारत की सभी भाषाओं की जननी नहीं है, फिरभी इस भाषा का वंशीय संबन्ध पूरे विश्व की भाषाओं से है। विश्व की कुछ भाषाएं संस्कृत से बहुत से शब्दों को उधार लेकर अब स्वतंत्र भाषा के रूप में बोली जा रहीं हैं। इसीसे संस्कृत भाषा के प्रभाव का परिचय हो जाता है। संस्कृत भाषा की यह गरिमा रहते हुए भी वह स्वतंत्र भारत की राजभाषा क्यों नहीं बन सकी ? यह प्रश्न सदैव सबके मन में प्रायः उठता रहता है।

स्वतंत्र भारत की जनता की रुचि एवं देश के श्रेयः को ध्यान में रखकर हमारे राजनेताओं ने यह निर्णय किया था कि कुछ वर्षों के लिये हिन्दी के साथ अंग्रेजी भी स्वतंत्र भारत की राजभाषा बनकर रहे। इसका जिक्र भारतीय संविधान में भी सविस्तार किया गया है और इसके लिये कई बार माननीय राष्ट्रपति द्वारा आदेश भी जारी किये गये हैं। अब सवाल यह है कि संस्कृत भाषा की इतनी प्राचीनता होने के बावजूद, उसका साहित्येतिहास इतना विस्तृत होते हुए भी और संस्कृत बोलनेवालों की इतनी बडी संख्या होकर भी उसे राजभाषा के रूप क्यों नहीं घोषित किया गया ?

वेदकालीन एवं वेदोत्तरकालीन संस्कृत रचनाओं को देखने से मालूम होता है कि संस्कृत भाषा कभी किसी प्रदेश-विशेष में आमलोगों की बोलचाल की भाषा अवश्य रही है। लेकिन कालांतर में संस्कृत भाषा का प्रयोग केवल धार्मिक क्रियाओं तक ही सीमित हुआ। इसतरह कई सदियों तक संस्कृत भाषा का प्रयोग संकुचित होकर उसका उपयोग वैदिक कर्मकाण्ड के लिये ही अनिवार्य एवं विशेषरूप से निर्धारित होने लगा। इसे संस्कृत भाषा पर लगाया गया अलिखित प्रतिबन्ध माना जा सकता है। इस स्थिति में करोडों जनता द्वारा बोली जानेवाली करीब 200 विभिन्न भाषाओं की जगह संस्कृत भाषा को स्थापित कर उसे राजभाषा का दर्जा देना कोई सरल काम नहीं है।

दरअसल संस्कृत के प्रयोग की कमी के कारण संस्कृत राजभाषा होने से वंचित नहीं हुई है। इसका कारण है "स्वार्थ की भावना"। मानेंगे कि यह हजारों सालों से भारतीय समाज के बडे हिस्से को संस्कृत से अछूत रखने का नतीजा हो सकता है। किन्तु अब समय बदल गया है। सबको साथ लेकर चलना है। प्राथमिक विद्यालय स्तर से संस्कृत माध्यम में शिक्षा प्रदान करने पर विचार करना होगा।

विद्यालयों में गणित, समाजशास्त्र, विज्ञान, इतिहास आदि विषयों को पढाने का माध्यम संस्कृत हो, तभी संस्कृत को भारत की राजभाषा बनाने का लक्ष्य सम्भव हो पाएगा। यह एक-दो दिनों का काम नहीं है, इस लक्ष्य को प्राप्त करने में कई दशक लग सकते हैं। लेकिन असाध्य की चीज कुछ भी नहीं है। बस, इच्छाशक्ति की आवश्यकता है। संस्कृत को राजभाषा घोषित करने से पूरे भारतवासियों के लिये अगाध ज्ञानराशि का दरवाजा स्वयं खुल जाएगा। इसके लिये भारत के संविधान में आवश्यक संशोधन करना होगा।

आधुनिक हीब्रू भाषा को पुनः स्थापित करने में एलिझर बेन येहूदा को सफलता अवश्य मिली होगी। मगर, संस्कृत भाषा के विषय में स्थिति अलग है। क्योंकि हीब्रू भाषा बोलनेवालों की संख्या बहुत कम है जबकि संस्कृत भाषा आज भी लाखों लोगों की भाषा है जो भले ही उनकी मातृभाषा न हो, किन्तु लाखों लोग अनायास सरल-सहज रूप से संस्कृत बोल सकते हैं। कुछ लोगों के लिये संस्कृत साहित्यिक भाषा है, तो कुछ लोगों के लिये संस्कृत में अपनी भावनात्मकताएं अन्तर्निहित हैं। हीब्रू भाषा का साहित्य सीमित है, जबकि संस्कृत भाषा के साहित्य की तुलना सागर से ही की जा सकती है। अतः हीब्रू या अन्य किसी भाषा को पुनरुज्जीवित करना या उसे पुनः आमलोगों की बोलचाल की भाषा बनाना जितना कठिन है या आसान है, उसकी तुलना संस्कृत भाषा के विषय में कतई नहीं करनी चाहिए। संस्कृत भाषा की स्थिति अब भी वैसी ही है जैसे वैदिक काल में थी।

यहां एक बिन्दु पर गौर से विचार करना होगा। वैदिक काल में सम्पूर्ण अखण्ड भारत की कुल आबादी प्रायः 5 करोड़ रही होगी। उन सभी को अगर संस्कृत बोलनेवाले मान लिया जाए, तो आज संस्कृत बोलनेवालों की संख्या करीब 10 करोड़ के आसपास है। अर्थात् वैदिक काल की अपेक्षा 200% अधिक लोग संस्कृत बोल सकते हैं। यह बडी उपलब्धि है संस्कृत के लिए। क्योंकि, वैदिक काल में अधिक-से-अधिक 10-20 भाषाएं रहीं होंगी। आज भारत में भाषाओं की संख्या 500 से अधिक है। इन 500 भाषाओं के बीच अपने अस्तित्व को बनाए रखना किसी बडी चुनौती से कम नहीं है। आज भारत की आबादी का 10 प्रतिशत लोग संस्कृत जानते हैं जो सुखद बात है।

वस्तुतः हमारे बीच कुछ लोग इस तरह पूर्वाग्रहपीडित हैं जो संस्कृत को अपने जीवन का एक अंग होकर भी मानने को तैयार नहीं। उनसे किसी प्रकार की आशा नहीं रख सकते। निःसन्देहतः कह सकते हैं कि संस्कृत का व्याकरण ही आम जनता को संस्कृत से दूर रखने का कारण बना हुआ है। धातुरूप, शब्दरूप आदि से बना संस्कृत का व्याकरणिक ढांचा सीखनेवालों के लिये बाधा बन जाती है। इसलिये शुरुआत में व्याकरण की ओर अधिक महत्व दिये बिना भाषा को सीखने की ओर बच्चों को आकर्षित करना चाहिए। अगर विभिन्न प्रकार के व्याकरण एवं शैली का प्रयोग कर हिन्दी बोली जाए, तो

हम उसे "हिन्दी की एक बोली" कहते हैं जबकि संस्कृत में ऐसा करें तो वह दोष कहलाता है और उसे हम स्वीकार नहीं करते। इसलिए जहांतक व्यावहारिक संस्कृत भाषा के प्रयोग का सवाल है, हमें व्याकरण में दोष होने पर भी संस्कृत भाषा को अपनाना चाहिए।

सरल भाषा होने के कारण हम अंग्रेजी नहीं पढते हैं। अंग्रेजी इसलिये पढते हैं कि उसकी उपयोगिता पूरी दुनिया में है और आवश्यक भी। संस्कृत का उपयोग पूरे विश्व में सर्वत्र नहीं होता इसलिये उसकी आवश्यकता हमें नहीं लगती। अतः संस्कृत को पढने की रुचि उत्पन्न किया जाए, भाषा को सर्वग्राह्य बनाया जाए और संस्कृत में निहित अगाध ज्ञानराशि को विशाल हृदय के साथ संपूर्ण विश्व के लिये खोल दिया जाए। इसतरह संस्कृत "भारत की पारंपरिक भाषा" के रूपमें अपनेआप घोषित हो जाएगी और भारत की राजभाषा बनने के लिये संस्कृत सन्नद्ध होगी।

इस तरह की घोषणा करने से पहले यह सुनिश्चित किया जाए कि घोषणा सार्थक भी हो। इस दृष्टिसे कुछ प्रमुख बिन्दुओं को ध्यान में रखना उचित होगा, जैसे :

(1) विद्यालयों, महाविद्यालयों एवं विश्वविद्यालयों में सरलीकृत संस्कृत को अपनाना चाहिए। प्राथमिक स्तर से लेकर उच्चशिक्षा की संस्थाओं तक बोलचाल की संस्कृत का पाठ ऐच्छिक या वैकल्पिक विषय के रूप में रखा जाए।

(2) अन्य भाषाओं की अपेक्षा संस्कृत को सीखना बहुत आसान है।

(3) संस्कृत भाषा के लिये एक राष्ट्रीय नियम/कानून हो जिसके द्वारा संस्कृत की शिक्षा पानेवालों के लिये छात्रवृत्ति, रोजगार के अवसर, विद्वानों के लिये गौरवधन आदि देने का प्रावधान रहे।

(4) संस्कृत के अध्ययनापेक्षियों को ध्यान में रखते हुए, संस्कृत शिक्षा में बाधक बने हुए अनावश्यक तत्त्वों को हटाना चाहिए।

(5) संघ सरकार के सभी प्रमुख दस्तावेजों को (जैसे स्थायी नियम, न्यायालय के अति प्रमुख निर्णय, सरकारी नीति से संबन्धित आदेश आदि) हिन्दी या अंग्रेजी के साथ-साथ संस्कृत में भी उपलब्ध हो।

(6) केवल परीक्षा की दृष्टि से ही नहीं, अपितु पृथक् रूपसे संस्कृत सीखने के इच्छुकों के लिये विशेष कक्षाओं की व्यवस्था हो।

(7) संस्कृत के पण्डित एवं कर्मकाण्ड में परिणतों के कल्याण हेतु सरकार के अधीन पृथक् विभाग स्थापित किया जाए।

(8) संस्कृत भाषा को केवल मन्दिरों तक ही सीमित न करके हर क्षेत्र में संस्कृत के प्रयोग को प्रोत्साहित किया जाए जिसतरह हिन्दी के प्रचार-प्रसार के लिये सरकार द्वारा कदम उठाए जाते हैं।

प्राचीनकाल से मीमांसा, दर्शन, व्याकरण, साहित्य, ज्योतिष्य, न्याय, सांख्य आदि विभिन्न शास्त्रों को सिखाने के लिये भाषा का माध्यम संस्कृत ही था। मगर बडे दुःख के साथ हम कोल्कात्ता स्थित विक्टोरिया म्यूजियम में रखे गये राजाराम मोहन राय की तस्वीर के नीचे लिखी हुई पंक्ति को पढ सकते हैं, जहां लिखा है – "You Struggled for Twelve Years and Agreed to Remove the Medium of Education from Sanskrit and English to English" (अर्थात् - आप करीब बारह साल तक लड़कर शिक्षा का माध्यम संस्कृत एवं अंग्रेजी को हटाकर अंग्रेजी रखने के लिये सहमत हुए) परिणामतः आज सामान्य महाविद्यालयों की बात तो दूर, संस्कृत महाविद्यालयों में भी शास्त्रों का अध्यापन अंग्रेजी के माध्यम से या अन्य किसी प्रादेशिक भाषा के माध्यम से करने के लिये हम बाध्य हैं। बहुत कम महाविद्यालयों में संस्कृत को माध्यम बनाकर शास्त्रों का अध्ययन किया जाता है।

देश के भविष्य को ध्यान में रखते हुए संस्कृत को राजभाषा के रूप में घोषित करना चाहिए। अगर किसीको इससे आपत्ति है, तो "राजभाषा" का पद न देकर, संस्कृत को "भारत की सांस्कृतिक भाषा" या "भारत की पारंपरिक भाषा" का गौरव देना चाहिए। क्योंकि, भारत की संस्कृति एवं परंपरा संस्कृत भाषा से होकर ही निकलती है। वेद, उपनिषत्, पुराण, रामायण-महाभारत जैसे प्राचीनतम इतिहास - काव्य आदि रचनाएं संस्कृत भाषा में ही मिलते हैं। हमारी संस्कृति, परंपराएं, हमारे आचार-विचार एवं अगाध ज्ञानराशि इन्हीं वेद, उपनिषत्, पुराणों के प्रतिबिंब ही हैं। इसका रू-बरू दर्शन संपूर्ण विश्व को कराने के लिये संस्कृत को "भारत की पारंपरिक भाषा" घोषित करना समुचित रहेगा। तमिल, कन्नड, तेलुगु जैसी भाषाओं को "शास्त्रीय भाषा" का दर्जा दिया गया है। वैसे ही संस्कृत के लिये "पारंपरिक भाषा" या "भारत की सांस्कृतिक भाषा" के रूप में घोषित करने के लिये यह पक्ककाल है।

*****

# वैयाकरणमतरीत्या शब्दानां नित्यत्वनिरूपणम्

**Sri. R. Sridhar**

Sri Ahobila Muth Adarsh Samskrita Maha Vidyalaya

Madurantakam

## उपोद्घातः

**काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्**[1] इत्युक्तरीत्या पाणिनीयं शब्दशास्त्रं न केवलं शास्त्रान्तराध्ययने उपकारकम् , अपि तु शब्दव्याख्यानरूपेण व्याकरणेन हि पदादिविभागशः शब्दमयस्य वेदस्य अर्था ज्ञायन्ते इत्यस्मात् तस्य शब्दशास्त्रस्य अध्ययने प्राधान्यं वर्तते। अत एव खलु श्रूयते वचनमिदम् - **यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र व्याकरणम्**[2] इति। एतादृशे महत्त्वपूर्णे शब्दशास्त्रे नैके विषयाः वर्तन्ते। यद्यपि सामान्यतः अवलोकेनेन शब्दव्युत्पत्तिप्रतिपादनपरमेव इदं शास्त्रमिति भायात्, तथाऽपि शास्त्रे विद्यमानानां प्रौढग्रन्थानाम् अध्ययनेन शास्त्रान्तरे प्रतिपादितानिव नैकान् विषयान् ज्ञातुं शक्नुमः। अस्तु एतावता। शब्दविषयप्रतिपादकम् इदं शब्दशास्त्रमिति तु सर्वविदितमेव। नास्त्यत्र कस्यापि विमतिः। परं शब्दानाम् उत्पत्तिविषये मतभेदः वर्तत एव। केचन शब्दस्य नित्यत्वम् अङ्गीकुर्वन्ति। अन्ये चानित्यत्वम् अङ्गीकुर्वन्ति। तत्र किं मतम् उचितं स्यादिति सप्रमाणं विचार्य, व्याकरणशास्त्रे शब्दानां यन्नित्यत्वम् अङ्गीकृतं तदपि प्रतिपाद्यते।

## विषयविवरणम्

वाक्यपदीये भर्तृहरिणा ब्रह्मणः शब्दस्वरूपत्वं प्रतिपादितम्। तदेवाभिप्रेत्य आदौ - **अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्**[3] इति प्रतिपादितम्। अधुना सामान्येन ब्रह्मणः नित्यत्वेन शब्दस्य नित्यत्वं तु निश्चयेन संभवत्येव। अस्तु तत्। अन्यानि अपि प्रमाणानि प्रदर्श्यन्ते। **जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते**[4] इति भगवद्गीतायां शब्दब्रह्मणः निर्देशः। तथैव **अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा**[5] इति महाभारते वाचः अनादिनिधनता अभिहिता। एवं नैकानि प्रमाणानि वर्तन्ते यच्छब्दस्यैव

---

1 अभियुक्तोक्तिः

2 सुभाषितरत्नभाण्डागारम्, वैयाकरणप्रशंसा, श्लोकः २ (पु.४२)

3 वाक्यपदीयम् १.१

4 श्रीमद्भगवद्गीता ६.४४

5 महाभारतम्, शान्तिपर्व, २३२.२४

ब्रह्मस्वरूपत्वं प्रतिपादयन्ति तस्य नित्यत्वञ्च प्रदर्शयन्ति। एषु व्याकरणशास्त्रे विद्यमानानि प्रमाणानि विचार्यन्ते।

**अ. भाष्यकाराणाम् अभिप्रायः**

महाभाष्ये भगवता पतञ्जलिना शब्दनित्यत्वानित्यत्वविचारः[1] कृतः। तत्र **किं पुनः नित्यः शब्दः, आहोस्वित्कार्य** इति प्रश्नमुपस्थाप्य, **संग्रह एतत् प्राधान्येन परीक्षितम्** इति समाधानमपि दत्तम्। यद्यपि तत्र **यद्येव नित्यः अथापि कार्यः, उभयथाऽपि लक्षणं प्रवर्त्यम्** इति भगवता उदीरितं तथाऽपि अग्रे शास्त्रस्य धर्मजनकत्वप्रतिपादनपुरस्सरं शब्दानां नित्यत्वमपि प्रतिपादितम्। तथा च भगवताऽपि शब्दानां नित्यत्वमेव अङ्गीकृतं ज्ञायते। तत्कथमिति चेत् -

तत्र मीमांसकाः पदवाक्ये वर्णसमूहरूपे एवेति ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दम् आहुः। वैयाकरणाश्च वर्णव्यतिरिक्तं पदस्फोटम् इच्छन्ति। अपरे च पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात् तेषाम् अर्थवत्त्वमपि काल्पनिकमिति वाक्यस्यैव शब्दत्वं संगिरन्ते। वैशेषिकास्तु ध्वनिरेव शब्दः, स च कार्यः इति आचक्षते। एवञ्च अधुना शब्दानां नित्यत्वे व्यर्थं व्याकरणशास्त्रम् इति विप्रतिपत्तिः। एवञ्च इममंशं मनसि निधाय **कथं पुनरिदं भगवतः पाणिनेः आचार्यस्य लक्षणं प्रवृत्तम्** इति प्रश्नमुपस्थाप्य **सिद्धे शब्दार्थसंबन्धे**[2] इति वार्तिकेन शब्दानां नित्यत्वं प्रतिपादितम्। तदर्थः - आचार्यः पाणिनिः शब्दार्थसंबन्धनानां स्रष्टा उत स्मर्ता इति प्रश्नः जायते। तस्य उत्तरत्वेन प्रवृत्तमिदं वार्तिकम् इति। शब्दाश्च अर्थाश्च संबन्धाश्चेति द्वन्द्वे शब्दार्थसंबन्धः, तस्मिन् शब्दार्थसंबन्धे सिद्धे , आचार्यस्य शास्त्रं प्रवृत्तम् इत्यर्थः ज्ञेयः। तथा च जातिस्फोटलक्षणो वा व्यक्तिस्फोटलक्षणो वा शब्दः नित्यः। अर्थस्यापि जातिलक्षणस्य नित्यत्वम्। सर्वेषां धर्माणां ब्रह्मणि अध्यस्तत्वेन शुक्तिरजतादिज्ञाने शुक्त्यादीनां विशेष्यत्वात् सर्वत्र अधिष्ठानभूतं ब्रह्मैव विशेष्यम्, विशेष्यमेव च द्रव्यम् इति सर्वशब्दानाम् असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यम् इति अर्थस्यापि नित्यता सिद्धा। एवञ्च शब्दार्थयोः संबन्धश्च शक्तिरूपं तादात्म्यमिति संबन्धस्यापि नित्यत्वं सिद्धम्। एवञ्च शब्दार्थसंबन्धे नित्ये सति शब्दप्रयोगे च लोकतः अर्थप्रयुक्ते अर्थबोधनाय प्रसक्ते सति शास्त्रेण धर्मनियमः क्रियते इति व्याकरणशास्त्रस्यापि वैयर्थ्यं न स्यात्। अत्र कदाचित् संशयः जायेत यद्वार्तिके **सिद्धे शब्दार्थसंबन्धे** इति सिद्धशब्द एव प्रयुक्तः, तर्हि कः तस्य शब्दस्यार्थः? कथं वा तस्य नित्यत्वार्थः स्वीकृतः? इति। नित्यपर्यायवाची सिद्धशब्दः इति तदुत्तरम्। तत्र उदाहरणान्यपि प्रदर्शितानि - **यत्कूटस्थेषु अविचालिषु भावेषु वर्तते अयं सिद्धशब्द** इति। तानि च उदाहरणानि यथा - सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धम् आकाशम् इति। यद्यपि पुनः कार्येष्वपि सिद्धशब्दस्य प्रयोगः वर्तते इति पक्षः उपस्थापितः।

---

[1] पाणिनीयव्याकरणमहाभाष्यम्, पस्पशाह्निकम्, शब्दनित्यत्वानित्यवविचारः

[2] पाणिनीयव्याकरणमहाभाष्यम्, पस्पशाह्निकम्, वार्तिकम्.१

तथाऽपि अन्ते समाधानरूपेण मङ्गलार्थम् आचार्येण सिद्धशब्दः प्रयुक्तः यश्च नित्यपर्यायवाची भवति इति प्रतिपादितम्।

एवञ्च शब्दानां नित्यत्वे किं प्रमाणमिति पृष्टे - **लोकतः**[1] इति पूर्वोक्तस्यैव वार्तिकस्य द्वितीयखण्डेन समाधानं यच्छति भगवान् पतञ्जलिः। लोके हि कार्येषु वस्तुषु अन्यथा व्यवहारः, नित्येषु वस्तुषु अन्यथा व्यवहारः। तत्र उदाहरणमपि प्रदर्शितम् - **घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वा आह - कुरु घटं कार्यम् अनेन करिष्यामि इति। न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वा आह - कुरु शब्दान् प्रयोक्ष्य इति**। एवञ्च निष्कृष्टार्थः - घटादयः अर्थक्रियार्थिभिः अन्यतः आनीयन्ते, उत्पादविनशयुक्ताश्च उपलभ्यन्ते इति तेषाम् अनित्यत्वम्। परन्तु शब्दादयः न एवं भवन्ति। शाब्दः व्यवहारः अनादिवृद्धव्यवहारपरम्परा-व्युत्पत्तिपूर्वक इति शब्दादीनां नित्यत्वं सिद्धम्। प्रसङ्गात् कश्चन संशयः जायते - यदि शब्दानां नित्यत्वं तर्हि व्याकरणशास्त्रेण किं क्रियते इति चेत् - शास्त्रेण धर्मनियमः। कोऽसौ धर्मनियम इति चेत् - शब्देनैव अर्थः अभिधेयः, न अपशब्देन इत्यमुं धर्मं नियमयति शब्दशास्त्रम्। यद्यपि भाष्ये महान् विचारः कृतः अस्मिन्नधिकरणे तथाऽपि सङ्क्षेपेण शब्दानां नित्यत्वं वा कार्यत्वं वा, नित्यत्वे किं मानम् इति सङ्ग्रहेण निरूपितम्॥

**आ. वाक्यपदीयदिशा पुनः दृढीकरणम्**

> **नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।**
> **सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः॥**[2]

इत्येवं वाक्यपदीयकारः शब्दस्य नित्यत्वविचारम् उपस्थापयति। पद्यार्थः - तत्र व्याकरणशास्त्रे सूत्राणां, वार्तिकानां, भाष्याणाञ्च प्रणेतृभिः पाणिन्यादिभिः महर्षिभिः शब्दार्थसम्बन्धाः नित्याः समाम्नाताः इति। निष्कृष्टतया वक्तव्यं चेत् - नित्यः शब्दः, नित्योऽर्थः, नित्यः सम्बन्धः इत्येषा शास्त्रव्यवस्था। एषां नित्यत्वानङ्गीकारे शास्त्रं न व्यवतिष्ठते। तत्कथमिति चेदुच्यते - शब्दार्थसम्बन्धानाम् अनित्यत्वस्य अङ्गीकारे पुरुषाणां स्वातन्त्र्ये शब्दार्थसम्बन्धाः स्वेच्छया अन्यथाऽपि कृताः भवेयुः इति शब्दार्थसम्बन्धा-नाम् अव्यवस्थया शास्त्रमपि न व्यवतिष्ठते। अधुना एषां शब्दार्थसम्बन्धानां नित्यत्वे तु विभिन्नकर्तृकस्य शब्दशास्त्रापरनामधेयस्य व्याकरणशास्त्रस्य एकविधशब्दार्थसम्बन्धज्ञापकतया व्यवस्था सुष्ठु उपपद्यते। एवञ्च आकृतिनिर्देशपरतया शब्दः नित्यः, नित्योऽर्थः, तत्समवायत्वात् शब्दार्थसम्बन्धस्तु स्वरूपेणैव नित्यः। किमर्थम् आकृतिनिर्देश इति पृष्टे - जातेः शक्यत्वे लाघवं स्फुटमेव भवति इति समाधानम्।

---

1 पाणिनीयव्याकरणमहाभाष्यम्, पस्पशाह्निकम्, वार्तिकम्.१

2 वाक्यपदीयम् १.२३

किञ्च अग्रे -

**नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते।**

**प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते॥**[1] इति इयं कारिका नित्यत्वं द्रढयति।

पद्यार्थस्तु - शब्दानां नित्यत्वे कृतकत्वे वा तेषां शब्दानाम् आदिः नाम प्रथमः कालः न विद्यते। शब्दानां कृतकत्वपक्षे सा च एषा नित्यता प्राणिनामिव व्यवस्थानित्यता उच्यते इति। यथा प्राणिनां देहस्य स्वरूपतः अनित्यत्वेऽपि तेषां तत्तद्देहपरिग्रहस्य अनादित्वाद् व्यवहारे प्रवाहरूपेण अवस्थानाद् व्यवस्थानित्यता नाम व्यवस्थया व्यवहारे प्रवाहरूपेण अवस्थानेन नित्यता उच्यते, तथा प्रकृतेऽपि शब्दानां कृतकत्वे व्यवहारे प्रवाहरूपेण अवस्थानाद् व्यवस्थानित्यता इति निष्कृष्टार्थः।

अत्र मतान्तराण्यपि निराकृतानि। तद्यथा - ये केचिद् ईश्वर एव जगत्कारणम् इति, केचित् काल इति, केचित्पुरुष इति। केचित्तु ईश्वरस्य सङ्कल्परूपा विद्या इति, केचित् क्षेत्रज्ञ इति, केचिच्च अनीश्वरकम् अकालम् अपुरुषम् अविद्यक्षेत्रज्ञम् अविद्यामात्रमेव मन्यन्ते। तेषां सर्वेषां मतानां नास्ति कश्चिद् अप्रवृत्तप्राणिव्यवहारः प्रथमो नाम कालाध्वा। एवञ्च शब्दार्थयोः इयम् अनादिरविच्छिन्ना प्रवृत्तिनित्यता नाम व्यवहारनित्यता। तदमुष्मिन् प्रसङ्गे भाष्यकारवचनं स्मरति - **सिद्धे शब्दार्थसंबन्धे** इति। किञ्च उद्धरति - **तदपि नित्यं यस्मिन् तत्त्वं न विहन्यते** इति। तदर्थः - यस्मिन्, तत्त्वं = स एव अयम् इति प्रत्ययः, न विहन्यते = न व्यावर्तते, तदपि नित्यमित्यर्थः। तस्माद् देशकालभेदेन उच्चरत्सु शब्देषु च स एव अयम् इति प्रत्ययः कदापि न विहन्यते इत्यस्मात् कारणात् इदं सिध्यति यन्नित्याः शब्दाः इति॥

**उपसंहारः**

एवञ्च वाक्यपदीयकारः स्वीये वाक्यपदीये पूर्वोक्तानां शाब्दिकानामेव मतानि अनुसृतवान्। तदेव हि प्रमाणं यच्छब्दानां नित्यत्वसमर्थने। एवञ्च यद्यपि कदाचिद् विषयान्तरेषु शाब्दिकेषु भेदः दृश्येत, तथाऽपि शब्दानां नित्यत्वपक्षे न कुत्रापि शाब्दिकानां भेदः। तथा चेमानि वचनानि अत्र स्मर्तव्यानि -

**क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम्।**

**प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत् पुरा॥**

**नित्यत्वं तु यावत् सृष्टिस्थित्या व्यवहारनित्यतया च बोध्यम्॥**[2] इति।

तथा च इदं निगमनरूपेण वक्तुं शक्यते यच्छब्दाः नित्याः, अर्थाः नित्याः, तथा शब्दार्थयोः संबन्धोऽपि नित्य एवेति शब्दनित्यत्ववादिनः वैयाकरणाः इति शम्॥

******

[1] वाक्यपदीयम् १.२८

[2] लघुमञ्जूषा

# स्फोटवादनिरूपणम्

**व. राजगोपालः**
उपाचार्यः, व्याकरणविभागः,
श्रीअहोबिलमठीयादर्शसंस्कृतमहाविद्यालयः,
मधुरान्तकम्

वैयाकरणाः वर्णानां वाचकत्वं न संभवतीति अभिमन्वते। वाचकत्वपक्षम् एवं विकल्पयन्ति ते । वर्णाः किं व्यस्ताः अर्थं प्रत्याययन्ति , उत समस्ताः इति ?

व्यस्तानां तेषां अर्थप्रत्यायकत्वं न संभवति । एकैकवर्णश्रवणेऽपि अर्थप्रतीतेः प्रसङ्गात् । द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेश्च । एवं वर्णानां सामर्थ्यमेव न संभवति । अतः तेषां अर्थप्रत्यायकत्वाभावः कैमर्थ्यसिध्दः।

नैय्यायिकानां मते वर्णाः आशुतरविनाशिनः इत्यङ्गीकृतम् । अतः तन्मतरीत्या उप्पन्नविनष्टानाम् अर्थप्रत्यायनसामर्थ्यं वक्तुं न शक्यते।

यद्यपि नित्याः वर्णाः इति मीमांसकमतं, तथापि तेषां केवलं सत्तया अर्थप्रत्यायकत्वं न भवेत् चक्षुरादीनामिव सर्वदा सर्वार्थप्रतीत्यापत्तेः । किन्तु धूमादयः इव वर्णाः ज्ञाता एव प्रत्यायकाः इति वक्तव्यम्, ग्रहणं च तेषां श्रावणप्रत्यक्षाधीनमिति प्रयत्नस्थानकरणैः क्रमेण उच्चारितानामेव तथात्वमिति वक्तव्यम्, तथापि द्वितीयवर्णोच्चारणे प्रथमोच्चारणहेतूनां प्रयत्नादीनां विनाशात् तदुच्चारणस्यापि नाशः इति कुतः सामर्थ्यम् ? तस्मात् वर्णानां सर्वथा वाचकत्वं न संभवति।

किं च शब्दात् अर्थं प्रतिपद्य, एकं पदं एकं वाक्यमिति प्रतीतिः, सर्वानुभवसिद्धा, अबाधिता च वर्तते। तस्मात् शब्दः इत्येकवचनं श्रूयते। वर्णानां वाचकत्वे शब्दैः इति बहुवचनेन किल भाव्यम् । अतः एकः स्फोटः अभ्युपगन्तव्यः । एकं पदम् एकं वाक्यमपि स्फोटमन्तरा उपपादयितुं न शक्यते ।

**व्युत्पत्तिः -**

स्फोटशब्दस्य द्वेधा व्युत्पत्तिः प्रदर्शिता शास्त्रविद्भिः ।

१. स्फुटति अर्थः अस्मात् इति स्फोटः ।

२. स्फुट्यते वर्णैः इति स्फोटः।

प्रथमव्युत्पत्तेः वाचकः इत्यर्थः । अयं स्फोटः भगवता पतञ्जलिना महाभाष्ये “अथवा प्रतीत पदार्थको लोके ध्वनिः शब्दः इत्युच्यते” इति पस्पशाह्निके उक्तम्। नवाह्निकेऽपि एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम् , भेर्याघातवत् , तद्यथा भेर्याघातः, भेरीमाहत्य, कश्चित् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्, कश्चित् चत्वारिंशत् । स्फोटस्तावानेव भवति। ध्वनि कृता वृद्धिः ।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महांश्च केषाचिदुभयं तत्स्वभावतः ॥

**प्रक्रिया - स्फोटविभागः -**

इतः परं स्फोटप्रक्रिया निरूप्यते । मनुष्यस्य मूलाधारस्था सूक्ष्मतमा वाक् त्रीणि पर्वाणि अतीत्य, तुरीये पर्वणि स्थूलरूपं भजमाना श्रोत्रेण उपलभ्या भवति। एतेषु पर्वसु सा वाक् क्रमात् परा, पश्यन्ती, मध्यमा, वैखरी इति नाम लभते । मध्यमाभिधाना वागेव अवान्तरस्फोटः इति व्यवह्रियते।

१. परा - इयं कुण्डलिनीरूपेण प्राणिनां मूलाधारे वर्तते । इयं कुण्डलिनी प्राणवायुसंयोगे व्यज्यते। इयं निस्पन्दा। अस्याः विवर्ताः एव पश्यन्त्यादयः। चेतना च इयम् । इयमेव शब्दप्रपञ्चम् , अर्थप्रपञ्चमित्युभयं सृजति ।

२. पश्यन्ती - नाभीस्थाने इयं वर्तते। इयमपि चेतना, सस्पन्दा । इयमपि सूक्ष्मस्फोटः ।

३. मध्यमा - हृदये पवनसंयोगात् पश्यन्त्याः विवर्तरूपा, परापश्यन्तीवत् चिदचिद्भागमिश्रा इयं सस्पन्दा।

४. वैखरी - विशुद्धाख्ये आधारे खण्डदेशे इयं सस्पन्दा श्रोत्रग्रहणयोग्या च वर्णाभिव्यञ्ज्ञा वाक्यस्फोट इत्युच्यते । अयं च स्फोटः वर्णपदवाक्यभेदेन सखण्डत्वेन च त्रिधा, अखण्डत्वेन च पदवाक्यभेदेन द्विधा । एवं पञ्च व्यक्तिस्फोटाः। जातिस्फोटोऽपि वर्णपदवाक्यभेदेन त्रिधा । आहत्य अष्टौ स्फोटाः । एषु अखण्डवाक्यस्फोट एव मुख्यः। वर्णस्फोट इत्यत्र वर्णपदं न प्रत्येकवर्णपरम् अपसिद्धान्तापातात् । किन्तु शास्त्रप्रक्रियानिर्वाहार्थं कल्पित प्रकृतिप्रत्ययपरम् ।

५. ध्वनिस्फोटयोः वैषम्यम् - ध्वनिः द्विविधः । तत्र प्रथमः प्राकृतः । प्रकृतौ भवः प्राकृतः। प्रकृतिः स्फोटः । तथा च प्राकृतः इत्यस्य स्फोटस्य अभिव्यञ्जकः इत्यर्थः । ध्वनिश्च स्फोटश्च पृथक्त्वेन नोपलभ्यते । अतः लोके जनाः ध्वनिं स्फोट इति मन्यन्ते। तत्त्वतस्तु स्फोटः अन्यः, प्राकृतध्वनिः अन्यः। तात्त्विकम् इमं भेदं जनाः न जानते ।

प्राकृतात् जातः स्थिरस्थायी स्फोटस्य अनभिव्यञ्जकः स्फोटोपलब्धिधारायाः जनकः वैकृतः इत्युच्यते । प्राकृतेन ध्वनिना स्फोटः अभिव्यज्यते । तदुत्तरकालस्थः ध्वनिः स्फोटात् विलक्षणः उपलभ्यते। स्फोटस्य विकार इव भाति । अतः वैकृतः इत्युच्यते ।

यथा वा सूर्यकिरणः घटादिपदार्थमिव भासयति प्रथमम् । अनन्तरं सः एव घटोपलब्धिधारां जनयति । अथापि घटे किञ्चिदपि न विशेषमादधाति । एवं प्राकृतध्वनिना अभिव्यक्ते शब्दे, उत्तरकालम् अनुवर्तमानः वैकृतध्वनिः शब्दविषयाः बुद्धिधारा जनयन्नपि शब्दं न प्रकाशयति। अतः वैकृतध्वनि संसृष्टमपि स्फोटं वैकृतध्वनिभिन्नमुपलक्षयन्तो वैकृतध्वनिगतं देशकालभेदं स्फोटे नाध्यारोयपन्ति ।

अत्र भगवद्भाष्यकाराणां पतञ्जलिमहर्षीणां वाक्यम् अनुसन्धेयं भवति "येन उच्चारितेन सास्ना लाङ्गूल ककुद खुरविषाणिनां संप्रत्ययो भवति सः शब्दः" इति। उच्चारितेन इत्यस्य प्रकाशितेन इत्यर्थः इति कैयटः व्याख्यातवान् । संप्रत्ययः इत्यस्य ज्ञानमित्यर्थः। भाष्ये "ध्वनिः शब्दः" इति वचनं तु लोकदृष्टिमनुसृत्य उक्तम्।

तपरसूत्रे भाष्ये स्फोटः शब्दः, ध्वनिः शब्दगुणः यथा- भेर्या हन्ता कश्चित् विंशतिपदानि गच्छति, कश्चित् त्रिंशत् , कश्चित् चत्वारिंशत् ध्वनिकृता वृद्धिः इति । अत्र कैयटः - द्रुतादिवृद्धिषु उपलब्धीनां कालभेदः इति प्रदीपाख्ये महाभाष्यव्याख्याने उपपादितवान् । वैयाकरणसिद्धान्तस्थेयभूतः नागेशः उद्योताख्ये आकरव्याख्याने ध्वनिकृता इत्यस्य वैकृतध्वनिकृता उपलब्धिकालकृता इत्यर्थः इति उपपादयामास ।

**स्फोटे मत भेदः -**

स्फोटस्य वाचकत्वमभ्युपगच्छत्सु वैयाकरणेषु केचित् सखण्डस्फोटवादिनो भवन्ति । ते स्फोटे वर्णादीनां सत्तां वदन्ति ।

अन्ये तु अखण्डस्फोटवादिनः । ते प्रतिवर्णं, प्रतिपदं, प्रतिवाक्यं, एक एव स्फोटः अस्ति, स एव अवयवत्वेन प्रतिभासते, तत्वतस्तु तत्र वर्णाः पदानि च न सन्तीति वदन्ति । एते ऐऔच् सूत्रभाष्यं प्रमाणयन्ति । तत्र च एवं भाष्यम् - उभयत्र स्फोटमात्रं निर्दिश्यते । रश्रुतेः लश्रुतिः भवति । अत्र उद्योतः एवमस्ति "वस्तुतः स्फोटः एव श्रोत्रग्राह्यः। वायुनिष्ठकत्वादिना च तदभिव्यक्तिः इति।

वाक्यपदीयव्याख्याने अयं निष्कर्षः प्रादर्शि। शब्दनित्यतावादिनो मीमांसकाः व्यक्तिस्फोटवादिनः जातिस्फोटवादिनश्च वैयाकरणाः। एतयोर्मते शब्दनित्यत्वं सूपपादं भवति।

कार्याः शब्दाः इति ये वदन्ति, तेषां मते शब्दाः स्वतः अनित्या एव । व्यवहारनित्यतया, आकृतिनित्यतया च नित्यत्वं ब्रुवते।

परमार्थतः स्फोटः पूर्वापरीभावरहितश्च तथापि काल्पनिकः भेदः भासते । अभिव्यञ्जकत्वेन ध्वन्याख्यस्य भेदाः अत्र आरोपिताः ।

यथा तोये भासमानं चन्द्रस्य प्रतिबिम्बं वस्तुतः क्रियारहितं जलस्य चाञ्चल्यक्रियया क्रियावदिव भाति तद्वत् । एवमेव स्फोटध्वन्योः सादृश्यं ध्वनिवर्ति क्रमिकत्व-ह्रस्वत्व-दीर्घत्वादिकं स्फोटे भासयति।

किं च यथा वा स्फोटः अर्थस्य प्रकाशको भवति, तथा स्वस्यापि प्रकाशको भवति। यथा वा दीपः घटादीन् अर्थात् प्रकाशयति, आत्मानमपि प्रकाशयति च तथा ।

प्राकृतो वैकृतश्चेति द्विविधो ध्वनिः इति पूर्वं उक्तम्। तत्र प्राकृतध्वनिं विना स्फोटः सामान्यरूपेण विशेषरूपेण वा न भासते । अतः प्राकृतध्वनिरेव स्फोट इति मन्यन्ते जनाः । ह्रस्वदीर्घप्लुतादिभेदाः प्राकृतध्वनिगता एव ।

इत्थं च पश्यन्ती मध्यमा वैखरी चेति त्रिविधः स्फोटः। त्रिविधाऽपि सा स्थूला सूक्ष्मा परा चेति भिद्यते । आहत्य वाचो नव भेदाः संपद्यन्ते। वर्णादीनां विभागरहिता स्वरप्रधाना संगीतरूपा वाक् स्थूला पश्यन्ती । तादृशेच्छाधीना ज्ञानरूपा परापश्यन्ती । चर्मवति मृदाङ्गादौ करवादादिना अभिव्यक्ता ध्वनिरूपा वाक् स्थूला मध्यमा । वादयितुमिच्छारूपा सैव सूक्ष्मा मध्यमा ।

**स्फोटज्ञानप्रयोजनम् -**

ननु स्फोटः अस्ति, स एव वाचकः इत्यादयः विषयाः सन्तु नाम । एतादृशस्य स्फोटस्य ज्ञानार्थं अनर्घम् अपुनःप्राप्यं च इदं जन्म सर्वं पर्युपयुक्तं स्यात् । जन्मनः आत्यन्तिकनिवृत्तिः किल प्रेक्षावता अपेक्षणीया । आमुक्तेः संसारो भवेत् किल । स्फोटज्ञानम् अस्मिन् विषये अकिञ्चित्करं हि । अत एव हि श्रूयते - “नहि नहि रक्षति डुकृञ् करणे” इति ।

स्वतः प्रामाणभूता श्रुतिरपि अत्र विचारणीया । “आत्मा वा अरे द्रष्टव्यः” इत्याम्नायते । आत्मसाक्षात्कारो हि कर्तव्यः। तदानीमेव हि अमृतत्वं सिद्ध्येत् । “तमेव विदित्वा अतिमृत्युमेति” इत्यपि आम्नातम् । अमृतत्वं च बन्धनिवृत्तिः । तत्साधनं च परब्रह्मसाक्षात्कारतुल्यं ज्ञानम् इति वैदिकाः सर्वे अभ्युपयन्ति ।

परमपि ब्रह्म व्याकरणेन ज्ञेयम् । इत्थं च स्फोटादिज्ञानात् मोक्षो न भवेत् इति केचित् प्रत्यवतिष्ठेरन् ।

तत्र एवं समाधानं वाक्यपदीये ब्रह्मकाण्डे कतिपयैः श्लोकैः अर्थापत्त्या प्रमाणान्तरेण च प्रतिपाद्यते।

वाचः उत्तमं रूपं परं ब्रह्मैव । तत् मायया उपप्लुतं न भवति । ज्योतीरूपं तदेव शब्दः इति नामान्तरेण उच्यते । तत् वैकृते ध्वनिरूपे आच्छादितं वर्तते।

**ऐककण्ठ्यम् -**

जगत्कारणं किमिति उपनिषत्सु चर्चा अजायत । तत्र छान्दोग्ये एवं श्रूयते "सदेव सौम्य इदम् अग्र आसीत् । "ब्रह्मैव इदं सर्वम्" "आत्मैव इदं सर्वम्" इति । कारणभूतस्य वस्तुतः सत्यत्वमुच्यते। एकत्वं ब्रह्मत्वम् आत्मत्वं च स्थाप्यते।

एवमेव वाग्विषयेऽपि वागेव अर्थं पश्यति । वागेव अर्थं ब्रवीति । वागेवाऽर्थे निहितं सन्तनोति, वाच्येव विश्वं बहुरूपं निबद्धम् । तदेव एकं प्रतिभज्य भुङ्क्ते। "ओमित्येतत् अक्षरमिदं सर्वम्" "ओमिति ब्रह्म, ओमितीदं सर्वम्" इति इमानि वचनानि कारण वस्तुतः शब्दरूपतामपि सिद्धान्तयन्ति ।

अतो वयं सप्रमाणं निश्चिनुमहे शब्दब्रह्मैव जगत्कारणमिति । अयं च स्फोटः स्वप्रकाशः इति "तमेव भान्तम् अनुभाति सर्वम्", "तस्य भासा सर्वमिदं विभाति" इति श्रुत्या ज्ञायते । शब्दाख्या प्रकाशः। तत्रैतत् सर्वमुपनिषद्धम् इति हेलाराजीयमपि उक्तार्थे प्रमाणम्।

चैतन्यस्यापि प्रकाशिका वागेव । इदमेव शब्दतत्त्वाख्यं ब्रह्म "बहु स्यां प्रजायेय" इति सङ्कल्प्य विचित्रं जगत् रचयति, माया अत्र सहकारिणी इत्यन्यदेतत्।

"ईश्वरः सर्वभूतानां हृद्देशे अर्जुन तिष्ठति" इति गीतावाचनं सर्वभूतहृदयवर्ति स्फोटवाक्यम् वस्त्वेव ईश्वरपदवाच्यमिति प्रतिपादयति ।

॥ शुभमस्तु ॥

# महाभारतात् कतिपयप्रतिनायकानां चित्रणम्

**वी.एस्.सुदर्शनः**
विद्यावारधिः, साहित्यविभागः
तिरुपति राष्ट्रिय संस्कृत विश्वविद्यालयः

**अवतरणिका** –

महाभारतम् महर्षिणा वेदव्यासेन विरचितः बहुप्रसिद्धः इतिहासः भवति । अस्मिन् ग्रन्थे कौरव-पाण्डवानां महायुद्धं मुख्यविषयरूपेण वर्णिता भवति। संस्कृतसाहित्ये लोकप्रियत्वदृष्ट्या आलोच्यते चेत् महाभारतस्य मूर्धन्यभूतं स्थानं वर्तते। तत्र हेतुः, मानवजीवनस्य धर्मार्थ-काम-मोक्ष-रूपाः समस्तपुरुषार्थाः अस्मिन् विशालग्रन्थे सुष्ठु सन्निवेशिताः भवन्ति ।

एवं, सामाजिकाः अपि पण्डितपामरभेदं विना सर्वेषां धर्मार्थकाममोक्षरूपचतुर्विधपुरुषार्थान् सम्पादयन्ति। महाभारते मानवजीवनस्य विविध विषयाः, विविधैः पात्रैः समीचीनतया सुष्ठु प्रतिपादिताः सन्ति। एवं, भारते विविधपात्राणां अनुसन्धानेन अयं अवबोधयते यत् यस्मिन् यथा वर्तते यो मनुष्यः – तस्मिन् तथा वर्तितव्यं स धर्मः। इति एतत् वाक्यं आधुनिकसमाजस्य सामाजिकानां कृते समुचितं, महत्तर उपदेशो भवति।

अतः एव संस्कृतस्य काव्यमिदम् अद्यापि जनजीवने सुविख्यातं, प्रेरणाप्रदं, नैतिकतां च सम्पादयति।

**प्रतिनायकस्य वैशिष्ट्यम्** -

वस्तुतः संस्कृतसाहित्ये यथा नायकस्य मूर्धन्यस्थानं वर्तते, तथा न वर्तते प्रतिनायकस्य। यतो हि प्रायः सर्वत्र प्रतिनायकाः नीचगुणैः पूरितत्वेन, अधमत्वेन उपस्थाप्यन्ते। तत्र हेतुः नायकानाम् उत्कर्षसम्पादनाय एव । यदि दुर्योधनादयः प्रतिनायकाः न भवन्ति चेत् धर्मादीनां नायकानां प्रतिष्ठा एव न उन्मीलिता भवति।

एवमेव रामादिवत् प्रवर्तनीयं न च रावणादिवत् इत्यादि महत्तराः उपदेशाः प्रतिनायकरावणाभावे अपूर्णाः एव भवन्ति । अतः, "यथा नायकस्य मूर्धन्यस्थानं वर्तते, तथा प्रतिनायकस्यापि महत्तरं स्थानं वर्तते " इत्यत्र संशयः न भवेत् । नायकप्रतिनायकयोः एकेन, द्विभिः वा अवलक्षणेन प्रतिनायकः

भवति। यथा महाभारते दुर्योधनः ईर्ष्यालुः, अहङ्कारी च। एवं रामायणे प्रतिनायके रावणे परदारलौल्यत्वम् इत्येते अंशाः ग्रन्थे विहगावलोकनेन एव ज्ञाता भवन्ति ।

परम्, एतत् अतिरिच्य गाढानुसन्धानेन प्रतिनायकेऽपि केषांचन विलक्षण सद्गुणानां समन्वयोऽस्माकं चेतसि अवश्यं स्फुरति एव । तान् विलक्षणगुणान् सामाजिकाः हंसवत् नीरक्षीरविवेकन्यायेन स्वीकुर्वन्तु आधुनिकसमाजदृष्ट्या।

अग्रे महाभारतात् प्रतिनायकस्य दुर्योधनस्यादरणीयाः सदगुणा: विवेच्यन्ते।

## दुर्योधनः

**अवतरणिका**-

कलिदेवस्य अवतारः, एवं पाण्डवानां शत्रुः दुर्योधनः, यस्य नाम श्रवणमात्रेण एव, सः राज्यलोभी, अहङ्कारी, दम्भी, महापापी, अयोग्यः, ईर्ष्यालुः इत्येतैः नीचगुणैः परिपूरितः महादुष्टः इति लोके प्रवादः अस्ति। परन्तु, अस्मिन्प्रतिनायके दुर्योधनेऽपि केचन विलक्षणा मानवैः आदरणीयाः, अनुसरणीयाश्च शौर्य-प्रतिज्ञानिर्वहण-कर्तव्यपरायणत्व-साहस-मित्रस्नेहादीनाम् उत्तमसद्गुणानां मञ्जुळ-समन्वयो महाभारतानुसन्धानसन्दर्भे अस्माकं चेतसि अनुभवगोचरो भवति।

अधुना अत्र स्थालीपुलाकन्यायेन दुर्योधनस्य केषांचन सदगुणानां विवेचनं क्रमशः अधः यथा मति प्रस्तोष्यते। यथा -

**१.जननम् – (महाकुलीनता)**

गान्धारदेशनरेशस्य सुलभस्य पुत्री, एवं धृतराष्ट्रस्य धर्मपत्नी गान्धारी। विवाहे कृते वर्षद्वयात् परं प्रथमतः दुर्योधनः जातः। दुर्योधनस्य जन्मनः समकालं राज्ये नानाप्रकारकं दुर्लक्षणं समुत्पन्नम्।

तथा दुर्योधनोऽपि मानवशिशोरिव क्रन्दनम् अकृत्वा गर्दभः इव कर्कशस्वरेण गर्जनमकरोत् । सूर्यातपः प्रखरः अभवत् - तप्तवायुः प्रवाहितः अभवत् वेगेन। एतद्यतीत्य चतुर्दिक्षु अमङ्गलकसूचनं वृत्तजातं विघटितम् अभवत्। अस्य दुर्योधनस्य नवनवतिः अनुजाः, एका अनुजा च ।

अबाल्यात् मातुलस्य शकुनेः पालन -पोषण प्रभावेन पाण्डवानाम उपरि ईर्ष्यां प्राप्तः । यतो हि पिता धृतराष्ट्रः जन्मान्धः आसीत् इत्यतः ज्येष्ठभ्राता सन्नपि सः राजपदे अभिषिक्तः नाभवत्। कनिष्ठः भ्राता पाण्डुः एव राज्यपालनं अकरोत्। कुरुराजासने पाण्डुः, अनन्तरं ज्येष्ठः युधिष्ठिरः राज्यापालनं करोति। दुर्योधनस्य जननसमयः अमङ्गलकर इति हेतोः राज्यपालनात् निरस्तः।

**२.शिक्षाभ्यासः**-

दुर्योधनेनः गुरोर्द्रोणाचार्यात् धनुर्वेदादि-अस्त्र-शस्त्र-शास्त्रादिविद्यानां साङ्गोपाङ्गम् अभ्यासः कृतः भवति। अत एव सः अनन्य-अस्त्र-शस्त्रेण युद्धं करोति स्म। एवं बलरामात् गदायुद्धं, मल्लयुद्धं च अभ्यस्तः भवति। द्वादशवर्षे गुरुकुलशिक्षाभ्यासानन्तरं गुरूणां कृते धन-धान्य-आभरणादीन् गुरुदक्षिणारूपेण समर्पितवान्। कौरवाणां शत्रवः पाण्डवाः भवन्ति। दुर्योधनो हि सदा शत्रूणां विषये अहर्निशं चिन्तयति स्म। यतो हि तदा एव शत्रूणां निर्मूलनोपायः स्फुरति, तेषां नाशः भवति च।

**३. वाक्पटुत्वम् , औज्ज्वल्यं च** -

दुर्योधनो हि केवलं परुषवाचीति न, अपि च सोऽपि मृदुभाषी, सद्व्यवहारी इत्यत्र न संशयः। यथा -

* सः स्वमृदुवचनैः पाण्डुपत्नीमाद्र्याः भ्रातरं शल्यं राजानं कुरुक्षेत्रयुद्धे कर्णस्य रथसारथिं अकारयत्।

* कर्णद्रौण्योः द्वन्द्वयुद्धस्य स्थगनम् अकरोत्।

* अस्य मृदुव्यवहारैः भगवान् श्रीकृष्णः समस्तां नारायणीसेनां स्वकीयां कुरुपक्षे कुरुक्षेत्रयुद्धे योद्धुम् अकारयत्।

* स्वात्मस्नेहनिमित्तं प्रियमित्रं राधेयम् अङ्गदेशस्य राजानम् अकारयत्।

* पितरं धृतराष्ट्रं स्वकीयमृदुवचनैः, सद्व्यवहारैः मन्त्रमुग्धं कारयति स्म।

**४. राज्यपरिपालनं, कार्यनिर्वहणक्षमता च** -

* द्यूतक्रीडायां जितः दुर्योधनः हस्तिनापुरस्य चक्रवर्ती बभूव। सः श्रेष्ठः राजा भवति स्म। यतो हि राजनीति, क्षत्रियधर्मानुसारं राज्यपालनं करोति स्म।

* हस्तिनापुरप्रजां स्वकीयसन्ततिं मत्वा तस्या आवश्यकतां परिपूरयति स्म।

* देशे वारं वारं याग-होम-पूजादीन् सुष्ठु निर्वत्य, भूसुराणां, प्रजानां च अन्नपानवस्त्राभूषणै-श्वर्यादिविभूतिं दाने समर्पयति स्म।

* तस्य कार्यनिर्वहणचातुर्यं कीर्तिदायकं भवति। यतो हि सुव्यवस्थापिताः गुप्तचाराः शत्रूणां पाण्डवादीनां भाविकविषयान् समुचितसमये निवेदयन्ति स्म।

* धृतराष्ट्र-भीष्म-द्रोणाचार्य-कृपाचार्यादीन् महापुरुषान् दुर्योधनः स्वकीये अधीने राज्यशासने वहति स्म।

* महाभारते महायुद्धकाले कुरुसेन सर्वदा, सर्वथा च सुष्ठुप्रकारेण सुव्यवस्थापिता भवति।

*दुर्योधनस्य अन्यो विलक्षणगुणो - यदा भगवान् वासुदेवः पाण्डवदौत्यकर्मणा हस्तिनापुरनरेशं दुर्योधनं मिलितुं हस्तिनापुरं प्रस्तौति। तदा भगवते वासुदेवाय मार्गे उषितुं अन्न-पान-वसन-आसनादिभिः

परिपूरित सकलविधैः सौकर्यैः परिपूरिताः विश्रामशालाः अकारयत् । परन्तु, पाण्डवपक्षात् दौत्यकार्याय प्रस्थितः भगवान् श्रीकृष्णः तान् उपभोगान् तिरस्करोति स्म।

५. **पश्चात्तापः**-

* दुर्योधनो हि प्रथमतः दैवापेक्षया पुरुषार्थे एव बहु विश्वसिति स्म। दैवापेक्षया पुरुषार्थः श्रेष्ठः इति अभिप्रैति स्म। सः स्वचातुर्यबुद्धिकौशलेन सदा पाण्डवपक्षपातिनां भीष्म-द्रोणाचार्य-कृपाचार्याणां स्वकीयकौरवपक्षे आकृष्य, पाण्डवैः सह युद्धं अकारयत्।

* यदा एते भीष्म-द्रोणादयाः महापुरुषाः एकैकशः दुर्योधनस्य कुरुक्षेत्रयुद्धे राज्यं प्राप्य, स्व स्व प्राणान् रणाग्नौ आहुतीकृतवन्तः, तदा स्व पराजय सन्दर्भे पतिव्रता द्रौपद्याः वस्त्रापहरणं, लाक्षागृहादीनां आचरित दोषाणां पश्चातापम् अनुभवति, एवं क्षमां च अर्पयति।

* मनुष्य जीवनस्य परमसत्यं अवगच्छति यत् पुरुषार्थस्य अपेक्षया दैवः श्रेष्ठतरः इति।

**उपसंहारः**-

एतेन प्रतिनायकस्य वैशिष्ट्यं, तस्मात् अस्माकं किम् प्रयोजनं इति विमर्शनेन संस्कृतसाहित्यप्रियाणां हृदयानन्दसम्पादनाय, एवं साहित्यरसिकानाम् ईषत्पुष्टिः भवेदिति जिज्ञासोर्ममापि अनेन साहित्यज्ञाने नूतनकान्तिरेखाः प्रसरिष्यन्ति इत्याशया चात्राहं प्रवृत्तः।

## कर्णः

स्निग्धतपोवनस्य छायायां भार्गवः परशुरामः वसुसेन कर्णस्य क्रोडे मस्तकं स्थापयित्वा गभीरः निद्रामग्नः आसीत्। कर्णः आसीत् भार्गवपरशुरामस्य सुयोग्यः शिष्यः। सहसा कर्णस्य जानुदेशे एकः विकटाकारः वज्रकीटः दंशितवान्। क्षतस्थानात् अजस्रधारया रक्तपातः अभवत् , तेन सह तीक्ष्णा यन्त्रणा। परन्तु कर्णः नीरवः आसीत्। कोऽपि कातरशब्दः तस्य कण्ठात् निर्गतः नाभवत् , चेत् गुरोः निद्राभङ्गः भवेत्। इदम् एकस्याः अद्भुतसह्यशक्तेः निदर्शनम्। कियत्क्षणात् परमेव परशुरामस्य निद्राभङ्गः जातः। सः अपश्यत् यत् कर्णस्य जानुदेशात् रक्तधाराप्रवहति स्म। परशुरामः अपृच्छत् - किम् इदम् वसुसेन ? तव जानुदेशात् रुधिरधारा वहति किमर्थम्? कर्णः सर्वम् अकथयत्। परशुरामः विस्मयेन विमूढो भूत्वा अवदत् – वज्रकीटदंशनस्य यन्त्रणां त्वं नीरवो भूत्वा सहितवान्। स्वल्पमपि कातरशब्दं न कृतवान् । कर्णः अवदत् - प्रभो, भवतः निद्राभङ्गः भवेच्चेत्, तस्मात् अहं निःशब्दं सहितवान् एतां तीव्रां यन्त्रणाम्। कर्णस्य विरूपं भाग्यम् - अतः तस्य सह्यशक्तिः परशुरामस्य मनसि करुणां विहाय सन्देहम् असृजत्। सः अपृच्छत् - वसुसेन, सत्यं वद किं त्वं ब्राह्मणः? यतः ब्राह्मणस्य एतादृशी सह्यशक्तिः कदापि न सम्भवेत्। कर्णः गुरोः समीपे तस्य परिचयं गोपयितुं न समर्थः। सः अवदत् - गुरुदेव, भवतः अनुमानं

सत्यम्। अहं न ब्राह्मणकुमारः, सूतपुत्रः भवामि। द्रोणाचार्यस्य समीपे ब्रह्मास्त्रशिक्षणाय गत्वा अहं अवगतवान् यत् सूतपुत्राय भवान् तत् शिक्षा न दास्यति। तस्मात् मम परिचयं गोपयित्वा भवतः समीपतः तां श्रेष्ठास्त्रविद्यां शिक्षितुम् आगतवान् , भवान् अपि कृपया शिष्यरूपेण स्वीकृत्य मह्यं शिक्षां प्रदत्तवान्। परशुरामः क्रोधेन प्रज्वलितः सन् अवदत् - मिथ्या परिचयं दत्वा त्वं ब्रह्मास्त्रशिक्षां गृहीतवान्। किं त्वं जानासि मिथ्या विनिमयेन लब्धा शिक्षा व्यर्था भवेत्। अहम् अभिशापं ददामि यत् तव चरमे प्रयोजनमुहूर्ते त्वं ब्रह्मास्त्रक्षेपणस्य मन्त्रं विस्मरिष्यसि। कर्णस्य शताकूतिसत्वे अपि परशुरामः न विचलः अभवत्। कर्णः नतमस्तकेन तस्मात् स्थानात् प्रस्थितः। अतीव रहस्यमयं खलु वसुसेन-कर्णस्य जीवनम्। पाण्डवजनन्याः कुन्तीदेव्याः अनूढावस्थायां सूर्यस्य तेजसा कर्णस्य जन्म अभवत्। कुन्ती लोकभयेन तम् एकस्मिन् पात्रे स्थापयित्वा सलिले वाहयति स्म। तमेव प्लवमानं शिशुपुत्रम् उत्तोलितवान् सूतजातेः अधिरथस्य पत्नी राधा। निःसन्ताना राधा सूर्यतुल्यं रूपवन्तं तं शिशुपुत्रं लब्ध्वा आनन्देन अधीरा अभवत्। सा तं पुत्रं देवतायाः दानम् इति मत्वा स्वीय पुत्ररूपेण परमादरेण तं पालयित्वा सा बालकं कृतवती। तस्य वसुसेन इति नामकरणम् तथा राधायाः पुत्रः इत्यर्थमादाय राधेयः इति तस्य नामान्तरमपि आसीत् ।

सूर्यस्य शक्त्या कुन्तीदेव्याः अपत्यरूपेण जननं लब्ध्वा अपि भाग्यविपर्ययवशात् कर्णः जीवनस्य अन्तिममुहूर्तपर्यन्तं सर्वेषां समीपे परिचितः अभवत् सूतपुत्ररूपेण। परन्तु तस्य रुधिरे यत् क्षात्रं तेजः प्रवहति स्म तत्तु व्यर्थं नाभवत्। अभिशप्तजीवनस्य माध्यमेनैव सः पञ्चपाण्डवसदृशः वीर्यवान्, सर्वेषु अस्त्रशस्त्रेषु नितरां पारदर्शी अजायत। सूर्यतेजसः सम्भूतस्य कर्णस्य अङ्गे जन्मकालादेव ग्रथितम् आसीत् कवचं कुण्डलं च। तयोः कवचकुण्डलयोः अभ्यन्तरे आसीत् तस्य प्रकृता शक्तिः। कवचकुण्डलरहितः खलु यदा सः भविष्यति तदैव तस्य जीवनं अपरः कश्चन अभिशापोऽपि आसीत्।

एकदा सः एकस्मिन् तपोवने भ्रान्त्या कस्यचित् मुनेः होमधेनुं शराघातेन हतवान्। मुनिः तस्मै अभिशापं दत्तवान् यत् युद्धक्षेत्रे चरमे दुःसमये कर्णस्य रथचक्रं मेदिनी ग्रसिष्यति। ईदृशे अभिशापग्रस्तजीवनसत्त्वे अपि कर्णस्य निःशङ्कचित्तं कस्मिन्नपि दिने विभ्रान्तं नाभवत्। सः अकुतोभयेन सूतपुत्रस्य परिचयं निधाय क्षत्रियधर्मपालनं कृतवान्। एकस्याः हि जनन्याः सन्तानः, एकस्य हि अस्त्रगुरोः शिष्यः, तथापि कर्णः चिराय पाण्डवपक्षात् विच्छिन्नः एव आसीत् । अस्य कारणं मन्ये , पञ्चपाण्डवानां मध्ये एकः भगवतमुखी शुभसंस्कारः आसीत्, कर्णस्य मध्ये नासीत् तादृशः संस्कारः। महाभारतस्य कर्णचरित्रे तस्य बहवः दृष्टान्ताः सन्ति।

कर्णेन सह पञ्चपाण्डवानां सम्मुखसमरः प्राचलत् तस्मिन् दिवसे, यस्मिन् दिने कुरुपाण्डवानाम् अस्त्रशिक्षा समाप्तिमलभत, परं द्रोणाचार्यैः सर्वसमक्षम् अस्त्रक्रीडाप्रदर्शनस्य व्यवस्थां कृतवान्।

धृतराष्ट्रः परमानन्दितः सन् अवदद् - अहम् अतीव प्रीतः कुमारगणस्य शिक्षा सम्पन्ना इति श्रुत्वा शीघ्रम् एकस्मिन् शुभे अहनि अस्य अनुष्ठानस्य आयोजनं कुरु। अहमेव चक्षुष्मान् भूत्वा सभास्थले उपस्थितः सन् तस्मिन् अनुष्ठाने योगदानं कृत्वा आनन्दोपभोगं कर्तुम् इच्छामि। विदुरः विशालायाः रङ्गभूमेः निर्माणं कारितवान् तथा लोकेषु प्रचारितवान् , येन सर्वे अस्मिन् महोत्सवे योगदानं कृत्वा कुरुपाण्डवगणस्य अस्त्रक्रीडां द्रष्टुं शक्नुवन्ति स्म। अतः एकस्मिन् शुभदिने सुभलग्ने च देवपूजान्ते आरभत कुरुपाण्डवगणस्य अस्त्रक्रीडाप्रदर्शनम्। तस्यां सभायां साधारणजनाः तथा कुरुवंशस्य पुरुषगणः सर्वे उपस्थिताः आसन् , गान्धारी-कुन्ती-प्रभृति-राजपुरनारीगणाश्च उपस्थिताः आसन्। यथासमयम् ज्येष्ठानुक्रमेण एकैकशः सर्वे दृष्टवन्तः तेषाम् अस्त्रप्रयोगविधिम्। अर्जुनः अस्त्राणां निक्षेपक्रियां प्रदर्शितवान्। एतस्मिन् अभ्यन्तरे सभाद्वारे एकः गुरुगम्भीरः ध्वनिः श्रुतः अभवत्। तत्क्षणादेव कवच कुण्डलधारी कश्चन वीरपुरुषः प्रवेशम् अकरोत्। तस्य अङ्गकान्तिस्तथा सौन्दर्य्यं सूर्यः इव आसीत्।

परन्तु तस्य सौन्दर्य्यस्य तथा तेजसः मध्ये दम्भस्य तथा विद्वेषस्य बहिः प्रकटनम् अभवत्। सः नान्यः किन्तु स्वयं कर्णः। सः अर्जुनं प्रति स्वकीयं विरूपमनोभावं प्रकटितवान्। अवदत्त - भो अर्जुन, अस्मिन् रङ्गस्थले त्वं यां यां क्रियां प्रदर्शितवान् , अहं तत् सर्वं हि प्रदर्शयामि। अतः परं द्रोणस्य अनुमतिं गृहीत्वा कर्णः अर्जुनेन या या अस्त्रपरिचालनक्रियाः प्रदर्शिताः ताः सर्वाः प्रदर्शितवान्। तत्क्षणात् दुयोधनः तस्मै सादरमभिवाद्य तम् आलिङ्गितवान्। कर्णः तदा तस्य सख्यं याचित्वा अर्जुनेन सह द्वन्द्वयुद्धस्य अभिप्रायम् अवगतवान्। दुर्योधनः कर्णस्य अनेन वचनेन आनन्दितः सन् अवदत् - त्वं मया सह अस्मिन् राज्ये सर्वम् उपभुङ्क्ष तथा मम शत्रोः मस्तके पादं संस्थापय। कर्णस्य तथा दुर्योधनस्य ईदृशेन आचारेण तथा परुषापमानेन अर्जुनः क्षिप्तः अभवत्। कर्णम् उद्दिश्य अवदत् सः - विना आह्वानेन ये सभास्थलम् आगच्छन्ति तथा वृथा एतादृशम् अपमानसूचकं वचनं कथयन्ति, ते नरकगामिनः भवन्ति। यदि अहं युद्धं करोमि, तर्हि त्वां तस्मिन् नरके एव प्रेषयिष्यामि। पाण्डवानां वनवाससमये ब्राह्मणवेशधारी इन्द्रः कर्णं कवचकुण्डलौ याचते। इन्द्रस्य कपटं सूर्यदेवः कर्णस्वप्ने सूचयति। तथा अपि , उदारस्वभावः कर्णः स्वकीय कवचकुण्डलौ इन्द्राय ददाति।

**उपसंहारः-**

एतेन प्रतिनायकस्य वैशिष्ट्यं, तस्मात् अस्माकं किम् प्रयोजनं इति विमर्शनेन संस्कृतसाहित्यप्रियाणां हृदयानन्दसम्पादनाय, एवं साहित्यरसिकानाम् ईषत्पुष्टिः भवेदिति, जिज्ञासोर्ममापि अनेन साहित्यज्ञाने नूतनकान्तिरेखाः प्रसरिष्यन्ति इत्याशया चात्राहं प्रवृत्तः।

# मीमांसायां षड्विधिप्रकारनिरूपणम्

**डा. एल्. सौजन्यकुमारः**

शास्त्राध्यापकः,

जगद्गुरु वेदकाव्य विद्याभवनम् , चेन्नै

**उपोद्घातः**

"धर्मो विश्वस्य जगतः प्रतिष्ठा" इति वेदे, "धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्" इति रामायणे च धर्मस्य उत्कृष्टता बहुधा प्रकीर्तिता अस्ति। धर्मः अयं यैः अनुष्ठीयते तेषाम् अप्राप्यं न किञ्चिदिह विद्यते। उच्यते हि - "धर्मो रक्षति रक्षितः" "धर्मे प्रयतमानस्य न किञ्चिदिह दुर्लभम्" "धर्मेण लभते सर्वं धर्मसारमिदं जगत्" इति।

एतादृशधर्मं वयं कथं ज्ञातुं प्रभवामः इति जिज्ञासायां "चोदनालक्षणोऽर्थो धर्मः" इति मीमांसासूत्रेण वेदेन यः विधीयते सः एव धर्मः इति ज्ञाप्यते। तत्र वेदाः धर्मं साक्षात् उपदिशन्ति शास्त्राणि तु वेदार्थबोधनद्वारा।

यद्यपि सर्वाण्यपि शास्त्राणि धर्मावबोधकानि भवन्ति तथापि मीमांसाशास्त्रवत् धर्मावबोधने निष्कृष्टानि न भवन्ति। यतो हि शास्त्रमिदं वेदार्थज्ञापनद्वारा धर्मस्थापनार्थमेव प्रणीतं वर्तते। अतः एव मनुना उच्यते -

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः॥" इति

इदं शास्त्रम् "अथातो धर्मजिज्ञासा" इति प्रथमसूत्रादारभ्य "अन्वाहार्ये च दर्शनात्" इति अन्तिमसूत्रपर्यन्तं वाक्यार्थनिरूपणद्वारा धर्ममेवानुदिशति।

मीमांसाशास्त्रे वाक्यानाम् अर्थनिर्णयाय केचन उत्कृष्टाः प्रकाराः आश्रीयन्ते। तत्र अन्यतमः प्रकारः वर्तते "षड्विधिप्रकारनिरूपणम्" इति। एकैकमपि विधिवाक्यं (विषयवाक्यम्) एकैकस्मिन् विधिप्रकारे अन्तर्भवति। तत्र लाघवगौरवादिकम् आलोच्य मीमांसकैः वाक्यार्थनिर्णयः क्रियते।

**षड्विधिप्रकारनिरूपणम्**

पूर्वमीमांसाशास्त्रे प्रथमाध्यायस्य चतुर्थे पादे उद्भिन्नामके द्वितीयाधिकरणे तत्र भवद्भिः खण्डदेवैः षड्विधिप्रकारनिरूपणम् कृतमस्ति। तद्यथा --

१) **प्रथमविधिप्रकारः**

शुद्धधात्वर्थकरणकभावनाविधिः आद्यः। यथा “अग्निहोत्रं जुहोति[1]” इति। अत्र अग्निहोत्रनामकेन होमेन इष्टं भावयेत् इति वाक्यार्थः भवति। न च अत्र इष्टसामान्यस्य अन्वयात् शुद्धधात्वर्थकरणकत्वं नास्ति इति वाच्यम्। यतो हि अत्र यद्यपि प्रवर्तकत्वान्यथानुपपत्त्या इष्टसामान्यं भावनायां भाव्यत्वेन अन्वेति तथापि तस्मिन् विधिव्यापाराभावात् शुद्धधात्वर्थकरणकत्वोपपत्तिः।

२) **द्वितीयविधिप्रकारः**

अन्योद्देशेन धात्वर्थकरणकभावनाविधिः द्वितीयः। यथा “अग्निहोत्रं जुहुयात् स्वर्गकामः” इति “व्रीहीन् प्रोक्षति” इति च। अत्र च स्वर्गोद्देशेन अग्निहोत्रहोमः, यागाङ्गभूतव्रीह्युद्देशेन प्रोक्षणं च विधीयते। एतस्य च प्रकारस्य पूर्वापेक्षया पदान्तरोपस्थितेः सापेक्षत्वेन विप्रकर्षात् दौर्बल्यम्।

{पूर्वत्र पदान्तरसापेक्षत्वेऽपि तत्र अतात्पर्यात् न गौरवम्। इष्टसामान्यस्य तु विधिपदादेवोपस्थितेः पदान्तरानपेक्षत्वम्।}

३) **तृतीयविधिप्रकारः**

धात्वर्थान्यकरणकभावनाविधिः तृतीयः। यथा “दध्ना जुहोति[2]” इति। अत्र अग्निहोत्रहोमानुवादेन करणत्वेन दधि विधीयते। एतस्य च पदान्तरसापेक्षत्वाविशेषेऽपि विधिव्यापारस्य कर्तव्यता-विषयकाज्ञातज्ञापनरूपस्य धात्वर्थनिष्ठत्वाभावात् पूर्वापेक्षयाऽपि दौर्बल्यम्।

{पूर्वत्र हि धात्वर्थस्वरूपस्य उत्पत्तिवाक्येन प्राप्तत्वेऽपि कर्तव्यतया अधिकारवाक्ये एव विधिः। प्रकृते तु धात्वर्थस्य स्वविधानार्थं अनुच्चारणात् पारार्थ्यापत्तेः विप्रकृष्टपदार्थान्तरविधानाच्च दौर्बल्यमिति विशेषः।}

४) **चतुर्थविधिप्रकारः**

धात्वर्थं साधुत्वार्थमनूद्यापि अन्योद्देशेन अन्यकरणकभावनाविधिः चतुर्थः। यथा ” दध्ना इन्द्रियकामस्य जुहुयात्[3]” इति। अत्र होमाश्रितं दधि इन्द्रियरूपफलोद्देशेन विधीयते। एतस्मिन् प्रकारे धात्वर्थस्य उद्देश्यत्वेनाप्यसम्बन्धात् पूर्वापेक्षया दौर्बल्यम्।

५) **पञ्चमविधिप्रकारः**

गुणविशिष्टधात्वर्थकरणकभावनाविधिः पञ्चमः। यथा “सोमेन यजेत[1]” इति। अत्र सोमवता यागेन इष्टं भावयेत् इति वाक्यार्थः। अत्रापि च विधेः श्रुत्यर्थाभ्यामुभयत्र व्यापारकल्पनात्

---

[1] तै.सं १-५-९-१

[2] मै.सं ४-७-७

[3] तै.ब्रां २-१-५६

सन्निकृष्टार्थविध्यसम्भवाच्च विप्रकृष्टार्थविधेः एकत्रैव युगपत् सम्भवासम्भवविरोधापत्तेः पूर्वापेक्षया दौर्बल्यम्।

६) **षष्ठविधिप्रकारः**

अन्यत्र गुणविशिष्टधात्वर्थकरणकभावनाविधिः षष्ठः। यथा "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः" इति। अत्र सूर्यदेवताकः चरुद्रव्यकः यागः ब्रह्मवर्चसरूपफलोद्देशेन विधीयते। अत्रापि पदान्तरोपस्थितेः सापेक्षत्वेन पूर्वापेक्षया दौर्बल्यम्।

इत्थं भाट्टदीपिकायां षड्विधिप्रकारनिरूपणम् कृतमस्ति।

अत्र च सति संभवे लघुभूतो विधिप्रकारः आश्रीयते। क्वचित् बाधके सति तु सिद्धान्ते पूर्वपक्षापेक्षया विधिगौरवाश्रयणमपि विद्यते। तत्र गौरवाश्रयणे किंचिद् बीजमवश्यं प्रदर्श्यते। यथा "वसन्ते ब्राह्मणोऽग्नीनादधीत" इत्यत्र पूर्वपक्षे "य एवं विद्वानग्निमाधत्ते" इति वाक्येनैव आधानस्य प्राप्तत्वात् , प्राप्ताधाने ब्राह्मणादिकर्तृत्वनिमित्ते वसन्तादिकालविधिः इति "तृतीयविधिप्रकारः" पूर्वपक्षे। परन्तु सिद्धान्ते वसन्तकालादिविशिष्टं ब्राह्मणादिकर्तृत्वविशिष्टम् आधानम् अग्न्युद्देशेन विधीयते इति "षष्ठविधिप्रकारः"। अत्र "य एवं विद्वानग्निमाधत्ते" इति वाक्यस्य यत्पदघटितत्वात् न आधानविधायकत्वं भवति इति कारणात् गौरवेऽपि सिद्धान्ते षष्ठविधिप्रकाराश्रयणम्।

एवं "वाजिभ्यो वाजिनम्" इत्यत्र द्रव्यदेवताविशिष्टकर्मान्तरविधानात् पञ्चमविधिप्रकारः सिद्धान्ते । अत्र वाजिशब्दस्य रूढत्वेन तेन विश्वदेवदेवतानुवादानुपपत्तेः, उत्पत्तिशिष्टद्रव्यावरोधे द्रव्यान्तरस्य निवेशानुपपत्तेः, प्राप्तकर्मानुवादेन अनेकगुणविधाने वाक्यभेदापत्तेश्च गौरवेऽपि पञ्चमविधिप्रकाराश्रयणम्।

इत्थं तत्र तत्र गौरवाश्रयणे कारणमपि प्रदर्शितम् इति शिवम्॥

---

[1] तै.सं ३-२-२

# अभिनयदर्पणे तद्धितप्रयोगाः

**यो.षण्मुखप्रियदर्शिनी,**
शोधच्छात्रा,
मद्रपुरीसंस्कृतमहाविद्यालयः

**उपक्रमः**

नाट्ये शास्त्रं बोधयितुं भरतमुनिना 'नाट्यशास्त्रम्' इति ग्रन्थो विरचितः। तस्यावार्चीनोऽचार्यो नन्दिकेश्वरोऽभिनयस्य स्पष्टीकरणार्थम् , अपिच विनियोगानां बोधनार्थम् 'अभिनयदर्पणम्' इति महदुपयोगग्रन्थमरचयत्। प्रायोऽभिनयः, रसाः, तेषां विनियोगाः इत्यादि विषयार्थमयं ग्रन्थः पठ्यते। 'प्रियतद्धिताः दाक्षिणात्याः' इत्यतो ग्रन्थेऽस्मिन् भाषायामौत्सुक्यं दातुं सौन्दर्यञ्च अनुभवितुं तद्धितप्रयोगाणामालोचनं क्रियते।

**शैषिकाः**

तत्र - बुद्ध्वाऽथ ताण्डवं ताण्डोर्मर्त्येभ्यो मुनयोऽवदन्।

पार्वती त्वनुशास्ति स्म लास्यं बाणात्मजामुषाम्॥ (अभि.दर्प. ५)

नाट्योत्पत्तिरेवं दर्शिता। नाट्यवेदः पूर्वं भरताय चतुर्मुखेन दत्तः। अनन्तरं शम्भुः प्रयोगमुद्धतं स्मृत्वा स्वप्रयुक्तं स्वगणाग्रण्या तण्डुना भरताय न्यदीदिशत्। तण्डुना प्रोक्तमित्यतः 'तेन प्रोक्तम्' (४।३।१०१) इति सूत्रादण्प्रत्ययप्रयोगोऽत्र दृश्यते। तत्ताण्डवं पश्चात् मुनयो मर्त्येभ्योऽवदन्।

ऐन्द्रं च गारुडं चैव ब्रह्मस्थानमिति क्रमात् (अभि.दर्प. २७५)

पादविन्यासभेदेन स्थानकादीन् वक्तुं सन्दर्भे इन्द्रस्य इदमित्येतस्मिन्नर्थे 'तस्येदम्' (४।३।१२०) इति सूत्रादण्प्रत्ययो योजितः। एकपादं समाकुञ्च्य स्थित्वान्यपदजानुनि उत्तानिते सति करं न्यस्य स्थितिरैन्द्रमितीरितम्। गरुडस्याकृतिरिव भासमानात्तत्सम्बन्धाद्गरुडस्येदमित्यर्थेऽण्प्रत्ययान्तः शब्दोऽत्र दृश्यते।

तया द्वारवतीगोप्यस्ताभिः सौराष्ट्रयोषितः।

ताभिस्तु तत्तद्देशीयास्तदशिष्यन्त योषितः॥ (अभि.दर्प. ६)

पूर्वं पार्वती देवी बाणात्मजामुषां लास्यमनुशास्ति स्म। उषया द्वारवतीगोप्योऽनुशिष्टाः। ताभिस्सौराष्ट्रप्रदेशस्य योषा अनुशिष्टाः। ताभिस्तद्देशीया इतरयोषा अपि ज्ञातवन्त इति क्रमः।अत्र 'सौराष्ट्र' इति पदं तद्धितप्रत्ययान्तं भवति। सुराष्ट्रादागता इत्यर्थे 'तत आगतः' (४।३।७४) इति सूत्रादथवा

सुराष्ट्रस्येदमित्यर्थे वा 'तस्येदम्' (४।३।१२०) इति सूत्रात्शैषिकोऽण् विहितः। देशीया इति पदे तद्देशे भवा इत्यर्थे 'तत्र भवः' (४।३।५३) इति सूत्राच्छप्रत्ययो विहितः।

**भावकर्मार्थाः**

कीर्तिप्रागल्भ्यसौभाग्यवैदग्ध्यानां प्रवर्धनम्।
औदार्यस्थैर्यधैर्याणां विलासस्य च कारणम्॥ (अभि.दर्प. ९)

कीर्तिः, प्रागल्भ्यं, सौभाग्यं, वैदग्ध्यमित्यादीन्नाट्यं वर्धयति। अपि चौदार्यं, स्थैर्यं, धैर्यमित्यादीनां विलासकारणञ्च भवति। एवं नाट्यप्रशंसां वक्तुमवसरयाचार्येणोक्तम्। इह प्रगल्भस्य भावः कर्म वेत्यर्थे ष्यञ्प्रत्ययो योजितः। एवमेव सौभाग्यं, वैदग्ध्यम्, औदार्यं, स्थैर्यं, धैर्यमेतेषां भावकर्मणोरर्थयोः ष्यञ्प्रत्ययो योजितः। 'वर्णदृढादिभ्यः ष्यञ्च' (५।१।१२३) इति सूत्रात्स्थैर्यमिति तद्धितान्तमिति सिद्धम्। 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५।१।१२४) इति सूत्रादन्येषु पदेषु तद्धितान्तं सिद्धम्।

स्थिरे कचग्रहे दार्ढ्ये वस्त्वादीनां च धारणे (अभि.दर्प. ११७)

हस्तानां विनियोगदशायां मुष्टिहस्तविषये एवमुक्तम्। दृढस्य भावः कर्म वा दार्ढ्यम्। अत्रापि 'वर्णदृढादिभ्यः ष्यञ्च' (५।१।१२३) इति सूत्रात्समर्थनं भवति। को मुष्टिहस्त इति प्रश्ने कुञ्चितानामङ्गुलीनां तलान्तरे मेलनादङ्गुष्ठश्चोपरियुतो मुष्टिहस्तो भवेदिति समाधानम्।

एवमेव माङ्गल्यं, मात्सर्यं, वैवर्ण्यं, सौन्दर्यमित्यादिष्वपि भावकर्मणोरर्थयोः ष्यञ्प्रत्ययो नियुक्तः।

**मत्वर्थीयाः**

श्रीमान् धीमान् विवेकी वितरणनिपुणो गानविद्याप्रवीणः
सर्वज्ञः कीर्तिशाली सरसगुणयुतो हावभावेष्वभिज्ञः। (अभि.दर्प. १७)

सभापतिलक्षणमिति विषये एवमाचार्येण प्रोक्तम्। श्रीः, धीः, विवेक इत्यादययो यस्य सन्ति, यः पारितोषिकवितरणे निपुणः, गानविद्यायां प्रवीणः, सर्वञ्च जानाति, यः कीर्तिशाली भवति, सरसगुणेन युक्तः, हावभावेष्वभिज्ञः, स सभापतिर्भवितुमर्हति। मतुप्प्रत्ययान्तौ श्रीमान्धीमानिति द्वौ शब्दौ। इनिप्रत्ययान्तो विवेकीति शब्दः। पूर्वे 'तदस्यास्त्यस्मिन्निति मतुप्' (५।२।९४) इति सूत्रमर्थं प्रत्ययञ्च बोधयति। अपरे 'अत इनिठनौ' (५।२।११५) इति सूत्रमिनिप्रत्ययं दर्शयति।

**स्वार्थिकाः**

वाचिकं सर्ववाङ्मयम्। (अभि.दर्प. १)

अभिनयदर्पणस्य मङ्गलश्लोक एष शिवस्य ध्यानपूर्वकं नमस्कारार्थं दत्तः। अखिलं भुवनं शिवस्याङ्गं भवति; व्याहृतं सर्ववाङ्मयं तस्य वाग्भवति; चन्द्रतारादयस्तस्याहार्यं; सात्त्विकं तस्य स्वरूपम्।

अत्र वाचिकमिति पदे 'वाचो व्याहृतार्थायाम्' (५।४।३५) इति सूत्राद्व्याहृतार्थायां वाचि वर्त्तमानायां वाक्शब्दात्स्वार्थे ठक्प्रत्ययो भवति। वाङ्मयमिति शब्दात् 'तत्प्रकृतवचने मयड्' इति सूत्रात्प्रकृतवचने प्राचुर्येऽर्थे वर्त्तमानान्मयट्प्रत्ययः स्वार्थे विधीयते।

**उपसंहारः**

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्। - (मालविकाग्निमित्रम् १.४)

भिन्नरुचेर्जनस्यैकं समाराधनं नाट्यमिति कालिदासेन उक्तम्। केवलं भिन्नरुचिरिति न। परन्तु भिन्नशास्त्राणां वीक्षणार्थमपि नाट्यमेकं समाराधनमिति नाट्यग्रन्थमिह व्याकरणदर्शनार्थं स्वीकृतम्। नानार्थं दर्शयितुं नानाप्रत्ययान्तशब्दानां शाब्दसौन्दर्यं स्पष्टीकर्तुं लघिष्ठः प्रयत्नः कृतः।

******

**सहायकग्रन्थसूची -**

1. Nandikeśvara Abhinayadarpaṇam; Edited and translated by Dr.Manomohan Ghosh.

2. Dance Gestures, with English Translation of Abhinayadarpaṇam; by Dr.P.Ramachandrasekhar.

3. अष्टाध्यायी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

4. अष्टाध्यायी-भाषा-प्रथमावृत्तिः (चतुर्थ-पञ्चमाध्यायात्मक-द्वितीयः भागः), पं. ब्रह्मदत्तः जिज्ञासु।